। कृतसचैलस्नानक्रियः स्पर्शनस्तु तिकायाविशेषमाह स्तूतिका त्विति। अत्रेदं च
विषये अपवादस्य वक्ष्यमाणत्वात् कन्याप्रसूः प्रसूतिका त्रिंशद्रात्रं पित्रे सुरकार्ये

न योग्या। पुत्रसूस्तु विंशतिरात्रं न योग्या। तथा च पैठीनसिः। सूतिका उत्तरवर्तीं विंशतिरा
त्रेण कर्माणि कारयेत् मासेन स्त्रीजननीमिति। अत्राशौचेन ष्टे निर्निमित्तकर्मानाधिकारास
त्त्वादाशौचमेव तर्ह्येतत् पर्यंतमिति केचित्। तन्न। सूतिका सर्ववर्णेषु दशरात्रेण शुध्यती
अ । कैतोचनष्टपकुशौचं सर्ववर्णविषयं विधिरिति प्रचेतोवचनविरोधात्। तेनाशौचे
गतेपि वचनात्तावत्पर्यंतं कर्मानाधिकार इत्येव युक्तं। इदं च त्रिंशद्रात्राद्याशौचोत्तर
मेव प्रवर्त्तते। अन्यथा विध्यनुवादविरोधापत्तेरिति पित्रिचरणाः। केचित्तु सूतिका
याः आशौचं द्विविधं। अस्पृश्यत्वलक्षणं कर्मानाधिकारलक्षणं च। तत्रास्पृश्यत्वाव वा
वध्येतरमात्रं विधीयते। यथादीक्षितस्यावभृथपर्यंतमग्निहोत्रहोमानाधिका
रेप्राप्ते एतयापुनराधेयसंमितयेष्ट्याग्निहोत्रं होतव्यमित्यग्निहोत्रहोमस्यावि
ध्यंतरं विधीयते तथात्रापि। किंच। विधेरुद्देश्यत्वेनैकस्मिन्पदे प्रयुज्यमानत्वविरोधो
न त्वनुवादमात्रे सोर्यंचरुं निर्वपेत् पशुमालभेतेत्यादौ निर्वपालंभनांशेनुवादस्य या
गांशे च विधानस्यांगीकारात्। तेन यथाशतं ब्राह्मणा सोमात्रत्यतीत्यत्र दशदशैके

कं च मासमग्निप्रसर्पेयुरित्येतद्वाक्यप्राप्तशतीत्वानुवादेन ब्राह्मणविधौ नवसु चमसेषु ब्रा
ह्मणप्राप्तावप्यप्राप्तांशेन तदधिके विधिमंगीकृत्य ब्राह्मण एव विधिर्यथा योगीकृतस्तथा त्रा
पीत्याद्युक्तः तत्र। अग्निहोत्रे द्विवचनादवध्यंतरविधिर्युक्तः न त्वत्र नादशांवचनमस्ती
ति विध्यनुवादैकप्रसरता न संगा यत्ते विंशतिरात्रशब्दस्य दशाहोत्तरलक्षणकल्पने लक्ष
णादोषापत्तेश्च। स्वतंत्रमेव विंशद्रात्रादिविधिर्न युक्तः। यच्चोक्तं विरुद्धदेश्ययोरेव वि
रोधो न तु विध्यनुवादयोरिति। तच्चोक्तं तिविलसितं। विधेरनुवादस्योद्देश्यस्योपादेये
न विरोधेन विरुद्धदेश्ययोर्विरोधाभावाद्वाजपेयाधिकरणस्थवार्त्तिकविरोधाच्च। किं
च। दंडी प्रैषानन्वाहेति तो पृषाः सप्तदशारत्निरित्येकपदे यौगिकेऽप्येति क्रमेतद्व्योक्त
त्यैव तादर्थ्यविगमेन विरुद्धदेश्ययोरेकत्र सत्त्वेनासदूषणं। किं त्वविध्यनुवादवि ३८
रोध एव। तेन सोमादौ मत्वर्थलक्षणावाक्यनिर्वेदित्यादौ क्वचिद्विध्यनुवादयोः सत्त्वेऽपि
दोष एव मस्त्येव। शतं ब्राह्मणा इत्यत्र त्वनुवाद्यसमर्पकेण शतशब्देन लक्षणयाऽनव
न्यूनशतोक्तेस्तत्रैव ब्राह्मणविधिरिति न किंचिदेतत्। यत्तु ब्रातकश्चिदाह योपनैके
नैस्त्वार्थ एकपदार्थ प्रत्यक्षद्विश्यते। अन्यं च प्रत्यक्षपादीय तेयथा वाजपेये। तत्र वैरूप्यं।
पदेन

मासेन विंशद्रात्रेणेत्यत्र द्वादशाहोत्तरदिने बाधिकानधिकारमात्रबोधनात्तत्र। अ
न्यथा द्वादशाहीनस्येत्यत्रापि प्रकृतितस्तिसृणामुपसदां प्राप्तेस्तदंशे षेत्वनुवादो विधिश्चे
ति वैरूप्यं स्यादिति। न विंशद्रात्रेण मासेनेत्याद्येकपदे एकप्रसरताभंगलक्षणं वैरूप्यं
वाजपेयाधिकरणोक्तं च विध्यनुवादयोर्वैरूप्यमजानन्नंध एव। द्वादशाहीनस्येत्य
त्र तु द्वादशाहीनानुवादेन ज्योतिष्टोमप्रकरण एवाग्निमनीकं सोमं शल्यं विष्णुं तेज
नमित्यादिवाक्यप्राप्तायामुपसद्यस्तिस्रो रात्रीश्च द्वादशवारमभ्यासस्य विधानान्न वै
रूप्यं। एवं च द्वादशाहीनस्य एकादशप्रयाजा निस्यादौ क्रियागतसंख्यायाः अभ्या
सात्प्राप्तत्वेऽपि विंशति र्घटाः इति वद्विंशद्रात्रेण मासेनेत्यत्र गतसंख्यायाः अ
भ्यासानिप्रायच्चायोगादक्रमाभ्यासायोगाच्च। स्वतंत्रमेव मासादिविधानमन्य
था विध्यनुवादापत्तेरित्युक्तमेव। किंच। क्षत्रजनन्याः त्रिया था द्वादशदिने
भ्यो धिकान्यष्टौदिनानि कर्मानधिकारः। तस्या एव स्त्रीजनन्या अष्टादश एवं
वैश्यायाः क्षत्रजनन्याः पंच। तस्या एव स्त्रीजनन्याः पंचदश। शूद्रायास्तु पुत्रजनन

न्या स्त्रीजनन्याश्च न किंचिदधिकमिति कथमेकं वाक्यं विरुद्धनानार्थप्रतिपादकं स्या
दित्यपि विरूप्यं बोध्यं। किंचैवं वादिनः पुत्रजनन्याः शूद्रायाः मासमध्येपि मासापवादेन विंश
तिरात्रमेव कर्मानधिकार आपद्येतेति यत् किंचिदेतत्। एतच्च सोमयागादिश्रौतभिन्नप
रं। प्रजातायाश्च दशरात्रादूर्ध्वं स्नानादीति कात्यायनसूत्रात्। अंगिराः। सूतके सूतिकाव ति ५
र्जं संस्पर्शो न निषिध्यते। संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते। पराशरः। यदि पत्न्यां प्रसूता
यां द्विजः संपर्कं गच्छति। सूतकं तु भवेत्तस्य यदि विप्रः षडंगवित्। संपर्कान्मैथुनं। तथा च स्मृ ग ५
तिः। नाशौचं विद्यते पुंसः संपर्कं चेन्न गच्छति। रजस्तत्राशुचि विज्ञेयं तच्च पुंसि न विद्यत इति। व्या
सः। सूतिकावासनिलया जन्मदा नाम देवताः। तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता। २०
प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा। त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनीति। पुत्रशब्दोपलक्ष का ५
पर मात्रं इति दिक्॥११॥ निर्हृत्यान्यं प्रमीतं दिवसमशुचिः कोपि चेदासवर्णं तिस्रो शौचोपाध्यायमाद्य म ३
कृत्वाथ कृच्छ्राणि नवैव चरेत्। नीत्वोपाध्यायमातापितृपरगुरून् ब्रह्मचारी न दोषीते
ष्वोन्ये निर्हृतो स्य व्रतमपि वितते त्वश्यतेवश्यमेव॥ अन्यमसपिंडं सवर्णं स्नेहादिना निर्हृ
त्य दिवसमशुचिः। एतच्चाहोरात्रं तद्दिनानां सिन्नन्न दृष्ट्वा वासिन श्चक्तेयं। यस्तु निर्हृत्य त
द्गृहवासमेव करोति न च तस्मात् तं तिष्ठ मसिद्धं वा नन्नत्यनि तस्य त्रिरात्रं। यस्तु तद्गृहे वसति तद
नस्य १ न्नं च न त्यजति तद् दशरात्रं। तथा च मनुः। असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत्। विशुध्यति
त्रिरात्रेण मातुराप्तांश्च बांधवान्। यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति। अनदन्नन्नमह्नै
व न चेत्तस्य गृहे वसेदिति। बंधुवत् स्नेहादिनेत्यर्थः। यस्तु ग्रामांतरे वसति तस्य सद्यो। ति
त पाच हारीतः। प्रेतस्पृष्टशौचं ग्रामे न प्रविशेत्सुरा नक्षत्र दर्शनात्। रात्रौ चेदादादित्यस्येति। अ
तिग्रहणेन सवर्णशवनिर्हरणे तु तदन्नभक्षणाभावेपि संस्पर्शेमेव दशाहाद्याशौचं। तथा च
कौर्मे। यदि निर्हरति प्रेतं प्रलोभाक्रांतमानसः। दशाहेन द्विजः शुध्येद् द्वादशाहेन भूमिपः। अ
र्धमासेन वैश्यस्तु शूद्रो मासेन शुध्यतीति। असवर्णप्रेतं निर्हरति न दानिर्हरणे यत्नातिप्र
युक्तमाशौचं। तथा च ब्राह्मणस्य शूद्रनिर्हारे त्रिंशद्दिनानि शूद्रस्य तु ब्राह्मणनिर्हारे दशदि
नानीत्येवं ज्ञेयं। तथा गौतमः। अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत्। पूर्वो वावरं तदाशौचोक्त
माशौचमिति। तृतीयग्रहणेनासवर्णनिर्हरणे तु द्विगुणं। तथा च व्याघ्रपात्। अवरश्चेद्वरं वर्ण
वरो वाप्यवरं यदि। वहेच्छवं तदाशौचं दृष्टार्थे द्विगुणं भवेदिति। यत्तु ब्राह्मे॥ यो सवर्णं तु मूल्ये
ननीत्वा चैव दहेन्नरः। आशौचं तु भवेत्तस्य प्रेतजातिसमं नृपेति। तदापद्विषयमिति निर्ण

यतं धो पित्र्व्वरणाः। सोदकनिर्हरिर्दशाह इति माधवः। अलंकारेणेऽपरांरवः। रूद्रपादोस पिंड
स्य प्रेतनिर्हरणे कृते। अन्नपानाद्युपवासस्यादशक्तौ स्नानमिष्यते। अपानाद्ये। स्नेहाय नात्मनं
२त द्विजं निर्हरति द्विजः। आद्योयः कठज्योतिष्टोमः। एषवाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टो
म इति वचनात्। तज्जनफलमाकु आप्लवे नैव। स्नानमात्रेणैव शुध्येत्। तथा च पराशरः। अना
थं ब्राह्मणं प्रेतं येवहंति द्विजायते। पदेपदे यज्ञफलं आनुपूर्व्याल्लभंतितिते। न तेषामशुभं किं
चित्पापं वा शुभकर्मणां। जलावगाहनात्तेषां सद्यः शौचं विधीयत इति। अपरार्केऽप्येवं पराशरो ग
पि। प्रेतसंस्पर्शसंस्कारैर्ब्राह्मणो नैव दुष्यति। वोढा चैवाग्निदाता च सद्यः स्नात्वा शुचिर्भवेदिति।
आस्वयमद्गृणं प्राणानामा मिर्शस्य ये रूपलक्षणं। असगोत्रमबंधुं च प्रेतीभूतं द्विजोत्तमं। वहि १९
त्वा दग्ध्वा च प्राणायामेन शुध्यतीति पराशरवचनात्। तथा यं कश्चित्। निर्हरेत्प्रेतमसपिं
डः कपंचन। स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति अंगिरोवचनाच्च। मातुलादि २१
संबंधे त्रिरात्रं। असंबंधि द्विजान्वाहित्वा दग्ध्वा च सद्यः शौचं संबंधे त्रिरात्रमिति पैठीन
सिवचनात्। अन्ये तु। असगोत्रः सगोत्रो वा योऽग्निं दद्यात्स नरः। सोऽपि कुर्यान्नवश्राद्धं शुध्ये
च्च दशमेऽहनीति। दिवोदासवाक्यात्तत्रापि प्रथमेणेवाशौचं। पैठीनसिवाक्यं चापद्यनुकल्पः

त्याऽऽहुः। उत्तरार्द्धे न ब्रह्मचारिणो विशेषमाह नीत्वेति। परं मगुरुराचार्यः। एतानुपाध्यायादीन्नी
त्वा निर्हृत्य ब्रह्मचारी न दोषी। व्रतं न लुप्यत इत्यर्थः। आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्र
तीतीति याज्ञवल्क्यवचनात्। तेनैतादृशस्थले प्रायश्चित्तरूपं पुनरुपनयनमेव तस्य न न
वति। आशौचं तु निर्हरणनिमित्तं तस्य भवत्येव। अत एव ब्रह्मचारिणः शवकर्मणो व्रता
निवृत्तिरन्यत्र मातापित्रोरिति गौतमीये। व्रतनिवृत्तेरेव पर्युदासतु न आशौचस्य। संध्यादि
कर्मलोपस्तु नास्ति। न त्यजेत्सूतके कर्म ब्रह्मचारी स्वकं क्वचिदिति छंदोगपरिशिष्टात्। यत्तु
पित्रोर्गुरोर्विपत्तौ तु ब्रह्मचार्यपि यः सुतः। स व्रतश्चापि कुर्वीत अग्निपिंडोदकक्रियां। तेना पा५
शौचेन कर्त्तव्यं संध्याचैव न लुप्यत इति चंद्रिकायां सर्वर्त्तवचनं तत्कर्मानधिकाररूपं आशौच
निषेधपरं। न तु निर्हरणनिमित्तस्य। अन्यथा निर्हरणे सूतके कर्मेति स्ववोक्तिविरोधादि
तितानपादाः। अपरार्कमाधवादयस्तु। आचार्यं वाप्युपाध्यायं गुरुं वा पितरं तथा। मात
रं वा स्वयं दग्ध्वा व्रतस्थस्तत्र भोजनं। कृत्वा पतति नो तस्मात्प्रेतान्नं तत्र न त्यजेत्। अन्यत्र
भोजनं नैकुर्यान्न च सैतैः सह संवसेत्। एकाहमशुचिर्भूत्वा द्वितीयेऽहनि शुध्यतीति ब्राह्मोक्ते
रेकाहमाशौचमाहुः। अन्यनिर्हरणे दोषमाहतेन्य इति। तेऽप्यत्रोपाध्यायादिभ्यः अन्यनि

हरणं कुर्वतोस्य ब्रह्मचारिणः। वितते चिराज्जितिमपि ब्रह्मचर्यव्रतमवश्यमेव त्र श्यते। ब्रह्म
चर्याल्लुप्ततो न वतीत्यर्थः। तथा च वसिष्ठः। ब्रह्मचारिणः शवकर्मिणो व्रतान्निवृत्तिरन्यत्र मा
तापित्रोरिति॥१२॥ उत्कृष्टानुयाने वसनसहितकौंनस्य बाह्युस्य वक्रिंस्पृष्ट्वाज्यं प्राश्य
शुध्येदपरेद्युर्मद्याचिर्हीनवर्णानुयाने। पक्षिण्येकोत्तराद्व्रजनश्च नवेद्यंतरत्वे त्रिरा
त्रं कृत्वा स्नात्वोसुनद्यां मुखुयमनशतं सर्पिराशं च कुर्युः॥ एवं हीनवर्णाशौचमभिप्राया
नुगमनाशौचमाह उत्पेति। ब्राह्मणस्य ब्राह्मणानुयानं क्षत्रियस्य क्षत्रियानुयानमिति
उत्पानुयानं। उत्कृष्टानुयानं क्षत्रियादेर्ब्राह्मणानुयानं तस्मिं तुल्योत्कृष्टानुगमनेव
कः सनसहितवस्त्रं अन्नस्य तुष्ठुते अवाह्युस्नात्वा वक्रिंस्पृष्ट्वा आज्यं प्राश्य शुध्येत्।
तथा च मनुः। अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्रा
ति श्य विशुध्यतीति। अत्र ज्ञातिः सपिंडः सपिंडानुगमनस्य विहितत्वेन तत्र दोषाप्रसक्तेः। २२
तथा च हारीतः। विहितं हि सपिंडस्य प्रेतनिर्हरणादिकं। दोषस्यात्वसपिंडस्य तत्राना
थक्रियां विनेति। हीनानुगमनाशौचमाह। अपेति॥ ब्राह्मणस्य क्षत्रियाद्यनुगमने द्विम न
होरात्रमाशौचं। तथा च वसिष्ठः। शवानुगमने चैवमिति। अहोत्र मंत्र प्रकृते। एकोत्तरा

नुव्रजने इह विषये पक्षिणी न वेत्। स्वपित्र्याएकांतरस्याहीनस्यानुगमेऽस्यर्थः। यथा ब्रा नै।
ह्मणक्षत्रिययोर्वैश्यस्य शूद्रानुगमने। यद्यप्यस्मिन्नर्थे मूलवचनं नास्ति तथापि द्व्यंतरत्वे ध्य
मै त्रिरात्रस्य वक्ष्यमाणत्वेन ततो न्यूनेऽएकांतरे परिच्छेदकापेक्षयां द्विरात्रादेराशौचकाला
४ ॐ परिच्छेदकत्वेन तत्राप्यदर्शनात् पक्षिण्येवैकांतरानुगमनाशौचपरिच्छेदकत्वेनोक्ते त्रं
५ त्रिरात्रेति ध्येयं। द्व्यंतरत्वेति। ब्राह्मणस्य शूद्रानुयाने त्रिरात्राद्यंतरं कर्तव्यमाह। त्रिरात्रं कृत्वासु
नद्यां महानद्यां स्नात्वा असुयमनानां प्राणायामानां शतं सर्पिराशं घृतप्राशनं च कुर्युः।
तथा च पराशरः। प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः। अनुगच्छेन्नीयमानं स त्रिरात्रेण २६
शुध्यति। त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगां। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्य
तीति॥१३॥ तातांवाचार्यके न्योन लज्ज लह्रो ब्रह्मचारी तयोर्दाशौचोन्येन्यस्कतद्दः पुनरु
पनयनं चाधिकं कारयेत्तु। अन्ये त्वज्ञातिके न्यो यदि ददति तदात्मसुत्तारथात्मासुः कु
र्युः कृच्छ्रत्रयं चाधमर्दहनविधौ तंतमेवाप्नुवंति। अत्राचार्यग्रहणेनोपाध्यायः मातामह
श्चोपलक्षते। अन्नन्यादिग्रहणेन पिंडदानाद्योर्ध्वदेहिकमुपलक्ष्यते। तथा च पित्रादि
न्योन लज्ज लतिलदो ब्रह्मचारी नदीयाशौचः तदीयानां सपिंडानां यह शास्त्रादिजात्यशौ

त्रिज५

चेतद्व्रतकृत्नवतीत्यर्थः। तथा च वचनं। गुरुप्रेतस्य शिष्यस्तु पितृमेधं समाचरन्। प्रेताहारैः समं
तत्र दशरात्रेण शुध्यतीति। तदन्येन्यस्ते तदन्नमन्नलदो ब्रह्मचारी पुनरुपनयनं चक्रा
रात्पूर्वोक्तमाशौचं च कुर्यादिति। तथा च ब्रह्मचारिणः शवकर्मणा व्रतान्निवृत्तिरन्यत्र माता
पित्रोरिति गौतमवचनात्। पित्रादिविषये व्रतनिवृत्तेः पर्युदासेन तत्र व्रतं च अशौचनिमित्त
कपुनरुपनयनप्राप्त्या तद्वेष्यन्यदहनादौ पुनरुपनयनमर्थात्सिद्धं। पित्रादिविषये त्व
न्त्यकर्मकरणनिमित्ताशौचस्य तु न पर्युदासः व्रतनिवृत्तेरेव पर्युदासात्। इदं चान्यस
पिंडदाहादौ पुनरुपनयनं कृच्छ्रत्रयस्याप्युपलक्षणं। तथा च मनुः। आत्यानां याजनं
कृत्वा परेषामंत्यकर्म च। अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहतीति। केचित्तु ब्रह्म
चारी न कुर्वीत शववाहादिकाः क्रियाः। यदि कुर्याच्चरेत्कृच्छ्रं पुनः संस्कारमेव चेति। स
पिंडक्रियाकरणे कृच्छ्रमात्रोक्तेः तेन कृच्छ्रत्रयमसपिंडदाहे ज्ञेयमिति वयं। संध्यादिक २३
र्मलोपस्तु नास्ति। नत्यन्ते सूतके कर्म ब्रह्मचारी कचिदिति छंदोगपरिशिष्टात्। यत्तु पित्रो
र्गुरोर्विपत्तौ च ब्रह्मचार्यपि यः श्रुतः। सुव्रतश्चापि कुर्वीत अग्निपिंडोदकक्रियां। तेनाशौ
चं न कर्त्तव्यं संध्या चैव न लुप्यते। अग्निकार्यं च नैमित्तं कर्त्तव्यं सायंप्रातश्च नित्यशः इति स्मृतिः च

र्मर्२ त्वके३

दिकायां संवर्त्तवचनं तत्कर्मानधिकाररूपाशौचनिषेधपरमिति पितृचरणाः। यदापि दि
वोदासीये। ब्रह्मचारी यदा कुर्यात्पिंडनिर्वपणं पितुः। तावत्कालमशौचं स्यात्पुनः स्नात्वा वि
शुध्यतीति वचनं। तदपि तावत्कालं दशाहमाशौचं स्यात्कर्मणि पिंडदानादावग्निहोत्र
होमादिवत्पुनः स्नात्वा विशुध्यतीति व्याख्येयं। अपरार्कमाधवस्तु। ब्रह्मचारिणः पित्रादे दय
र्दाहादिकरणेपि तदन्नभक्षण एव दशरात्रं अन्नभक्षणाभावे तु। आचार्यं वाप्युपाध्या
यं गुरुं वा पितरं तथा। मातरं वा स्वयं दग्ध्वा व्रतस्थस्तत्र भोजनं। कृत्वा पतति नो तस्मात्प्रे
तान्नं तत्र भक्षयेत्। अन्यत्र भोजनं कुर्यान्न च तैः सह संवसेत्। एकाहमशुचिर्भूत्वा द्वि
तीयेहनि शुध्यतीति। ब्रह्मवचनादेकाहं इत्याहुः। तथा च संकरदानं च नाभीयान्न च तैः स
संवसेदिति तदन्नभक्षणाभावं दर्शयति। दिवोदासस्तु। एकाहमशुचिर्भूत्वेत्यत्रपदोक्त
ब्रह्मवाक्यादौर्ध्वदेहिककर्तुर्ब्रह्मचारिणः प्रथमदिन एवाशौचं तन्निमित्तः संध्यादिलो
पश्च। द्वितीयादिने स्तु अपिंडदानकाल एव शौचं न्यो नान्यदेत्याह संप्रतिदिनं नाशौच
कल्पनागौरवादपेक्षः। तेन दशाहमस्पृश्यत्वे निमपमेहन्यशुचिर्द्वितीये हनि पिं
डदानादौ स्नात्वा शुचिर्भवतीति कर्मांगस्नानविधानार्थमित्येव युक्तं। अंत्यकर्माकरणे

तु ब्रह्मचारिणः पित्रादिमरणेप्याशौचाभावः। सोपि ब्रह्मचर्यकाल एव। समावर्त्तनोत्तरं तु
सर्वेषां ज्ञातीनां त्र्यहाशौचं। आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात्। समाप्ते तूदकं दत्वा त्रिरा
त्रमशुचिर्भवेदिति मनुवचनादिति। मिताक्षरायां तु पित्रादि विकल्पः। पितर्यपि मृते नैषां
दोषो भवति कर्हिचित्। आशौचं कर्मणोन्तस्य आसन्नब्रह्मचारिणामिति छंदोगपरिशिष्टा
दित्यन्यत्र विस्तरः। ब्रह्मचारिव्यतिरिक्तानामाह अन्ये चेति ब्रह्मचारिणा असपिंडाः
अज्ञातिकेभ्यः समोत्कृष्टवर्णेभ्यः असपिंडेभ्यो पद्यन्नलंजलतिलांजलिदानतश्चयुक्ता स्र
शुभाः। तदाशौचभाजः स्युः। कृच्छ्रत्रयं चैव ते कुर्युः। तथा च वचनं। सगोत्रो वा सगोत्रो वा योग्निर
धान्सखे नरः। सोपि कुर्यान्नवश्राद्धं पिंडं चैव दशमेहनीति। तथा माधवीयाचारेपि। निरन्वये ये
सपिंडे तु मृते संनिदयाचितः। तदाशौचं त्रिरात्री चाहिपितृवाक्ये यामिति। कृच्छ्रत्रयं च सर्वो
क्तमेव मनुवचनं। ज्ञात्यानां याजनं कृत्वा परेषामंत्यकर्म च। अभिचारमहीनं च त्रिभिः कृ २४
च्छ्रैर्व्यपोहतीत्यादिः। परे सवर्णाः असपिंडाः। हीनवर्णेषु तु द्विगुणं त्रिगुणं चार्द्धगु
णा शूद्रीयं तु असंबंधिद्विजान्वहेच्च दहेच्च सद्यः शौचं संबंधे त्रिरात्रमिति मातुल
वादिसंबंधे पैठीनसिना। त्रिरात्रमुक्तं तदापद्यत्तु कल्प्यं इति वाच्यपेययाज्ञिनः। धर्मार्थं सकृ
त्वोर्ध्वदेहिकरणे स्नानप्राणायामैरग्निस्पर्शनैः शुद्धिः तथा च पराशरः। प्रेतसंस्पर्श

संस्कारे ब्राह्मणो नैव दुष्यति। वोढा चैवाग्निदाता च तैस्सह स्नात्वा विशुध्यतीति। बृहन्नारदीये। अ
नाथविप्रक्रमणं येयो देहे स्मरं दोत्तमः। अश्वमेधसहस्राणां सहस्रं फलमश्नुते। अथ मदन्नवि
२म धाविति। स्नापेत्तया अर्धवर्णस्य दहनादिकरणे तं तं वर्णमाप्नुवंतीत्युत्पानवतीत्यर्थः।
तथा च ब्रह्मपुराणे। ब्राह्मणस्त्वन्यवर्णानां नैकरोति कथं चन। कामाल्लोभाद्भयान्मोहात्कृ
त्वा तज्जातितां व्रजेदिति। १४। पालाशी माहिताग्नेः प्रतिकृतिमप्यवाप्तौ निर्दिष्टा दशाहा
द्याशौचाज्ञातयः स्युस्ततस्तत्र कृणां चीयतां न्येव कुर्युः। अन्योविमाघ्रशौचे सकृद्दद्वनम
नर्द देशावदाशौचकुस्याद्या वत्तेषां त्रेव्रतमपि च चरेद्गेदनेत्वेकरात्रं। देशांतरमृतस्यशरीला रा
भेदाह विधिमाह पालाशीमिति। आहिताग्नेश्चौताग्निमृतः प्रेतस्य शरीरालाभे तत्कृती नि
तवलानेपालाशी पलाशवृंतनिर्मिता प्रतिकृतिस्स्वशाखोक्तमार्गेण दग्धा तद्दिनमस्य
त्यैवज्ञातयः सपिंडादशाहादिस्वस्वाशौचभागिनः स्युः। अस्थिदाहस्य पश्चान्निर्दिष्टे शेपि
सर्वत्नावोत्र ज्ञेयः। ज्ञातिपदं चोपलक्षणं। तेन दुहितृदौहित्रादयो दाहदिनप्रभृत्येव स्वस्वा
शौचभागिनः स्युः। तथा च वसिष्ठः। आहिताग्निश्चेत्प्रवसन्म्रियेत पुनः संस्कारं कृत्वा शववदा र
शौचमिति। अत्रोर्ध्वमपूर्वसंस्कारस्य लौकिकत्वेन संस्कारत्वाभावेपि संस्कारसमानकार्यत्वादा

संस्कारस्तंगोलौयदाऽन्तर्देशांतरमृतस्याहिताग्नेः शरीरं त्वन्यनेतदातदेवदग्धव्यं।आहिताग्नो
विदेशस्थेमृतेसति कलेवरौ निधायैतनाग्निनिर्यावत्तदीयैरपि दह्यत इति आलोके। यत्तुपूर्व
यो मारणिपेनाप्यथैश्चाग्नौर्दग्धाः तदाविधुराधानरहितस्यपश्चान्मृतस्याहिताग्नेर्लौकिकाग्निनैवदा
ह्यतपावमदनरत्ने ब्राह्मे। आहिताग्न्योर्द्वयोर्दंपत्योर्यस्त्वादौ म्रियते तं तु वि। तस्य देहं सपिंडैश्च दग्ध्वाग्नि
निरग्निभिःपश्चान्मृतस्यदेहः स्तु दग्धव्यो लौकिकाग्निनेति। कारिकायां। पत्नीमपि दहेद्वेदेर्ने चेत्पुप्र
र्वं म्रियतामृदि। अनग्निकां दहेद्देवं कापालेन हविर्भुजा। अग्निवर्णकपालं तु कृत्वा तत्र विनिक्षिपेत्तो
उ७ करीषाहितनो वह्निजातो यः स कपालाग्निरिति। भरद्वाजसूत्रेऽपि। तयोर्यः पूर्वो म्रियते तस्याग्नित्रेता
यां पितृमेधः संपद्यते पश्चान्मृतस्योपासनेनेति। यत्तु पद्माहिताग्निरुत्सृष्टाग्निर्विच्छिन्नाग्निर्विधु
राग्निर्वा प्रमीयेत नतमन्ये न त्रेताग्निभ्यो दहंति। विज्ञायते चाधानप्रभृति यजमान एव आग्न्योर्नुबं
तीति भरद्वाजसूत्रं। तस्यायमर्थः। आहिताग्निर्द्विविधः। श्रद्धाहिताग्निर्येन च विधुराधानं कृतं ता
दृशो विधुराहिताग्निश्च। तयोरुभयोरप्युत्सृष्टाग्नित्वं विच्छिन्नाग्नित्वं च विशेषणं तथा चात्र प २५
क्षद्वयमेव नत्वत्र यं तृतीयवाशद्वाभावात्। तेचयथा महार्णवे तरं यत्र गिरि विच्छिन्न च धायकः
वा चोपत्न विनियंतद्दस्याह्तं न तृतीयवाशद्वाभावात्। पक्षद्वयं तथात्रापि। एवं च यथाप

त्नी चेद्विधवा तूष्णीं प्रमीयेत न कथं च न। तदा त्रेताग्निशून्यत्वाग्निर्मथ्येनैव तां दहेदिति त्रिकां
डमंडनेन विधिवायाः। आहिताग्नित्वेऽपि त्रेताग्निशून्यत्वामत्रिर्मथ्येन दारु कृतस्तथा पत्नी
कस्य मृतस्याहिताग्नित्वेऽपि विधुराधानाद्यभावेनाग्निशून्यत्वाल्लौकिकेनैव दाहः। एवं चा
हिताग्निमग्निभिर्दहंतीति वाक्यं निर्द्दिष्टेताग्निमंतं प्रवर्त्तत इति। नविधुराधानशून्यस्य प्रे
ताधानं प्राप्तिकाले। तयोर्यः पूर्वो म्रियत इति सूत्रं यद्यप्यविशेषेण प्रवृत्तं तथापीदं पत्नीमा
त्रविषयं तथा च यद्याहिताग्निरुत्सृष्टाग्निर्वा तिथ्यपाकृतसूत्रानुरोधाद्विधुराधानरहितस्य हि ६
स्यापि प्रेताधानेनाग्न्युत्पत्तिमाऊः। तथा च त्रिकांडमंडनः। विच्छिन्नविह्निमुत्सृष्टपावकं वि
धुरावलं। आहिताग्निं द्विजं शांतं प्रेताग्न्युत्पत्तिसिद्धये। प्रेताधानं प्रकुर्वीतेत्साद्वीति दिक्।
ततन्नई इतरतृणांपालाशीप्रतिकृतिमोत्स्थी निवादग्ध्वा त्रीण्यहान्येवाशौचं कुर्युः। तथा च ब्र
ह्मपुराणे। अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना द्विजैः। एवं पर्णशरं दग्ध्वा त्रिरात्रमशुचि
र्भवेदिति। इदं च त्रिरात्रं पत्नीपुत्रयोः सर्वमगृहीताशौचयोर्दशाहाद्येवागृहीताशौचयो
स्तु त्रिरात्रं। तत्रापि दशाहमध्ये न त्रिरात्रं। तत्र प्रोषिते कालशेषस्यादित्युक्तेः। बहूचपू ६
रिशिष्टे। अथ पालाशविधानमिति संस्कारःस चेद्दंतदशाहस्यात्तत्रैव सर्वं समापयेत्। ऊर्ध्वमाहिताग्ने

१ मा दशाहात्सर्वमाशौचं कुर्यात्। पत्नीपुत्रयोः पूर्वमगृहीताशौचयोः सर्वमाशौचं। गृहीताशौचयोः क
र्मांगं त्रिरात्रमिति। पत्नीमृतौ न तु स्त्रीवं सपत्न्योश्चैवमिति स्मृत्यर्थसारे। अन्यस पिंडानां स ब
२५ वत्सरे शिरे दग्धे त्रिरात्रं। तथा चांगिराः। देशांतरमृतं श्रुत्वा नाशौचं चेत्कर्पेच न। कालात्यये
विकृती तदाहकालं दिनत्रयमिति। स्मृत्यर्थसारे गृहीताशौचानां स्नानमात्रमित्युक्तं। विधा
दशौ तु प्रतिकृतिदहने त्वग्निरेस्यात् त्रिरात्रमित्यभिधानेदेवं पर्णशरं दग्ध्वे। नित्यकर्मा प्रत्युपाच्च
दाहकर्तुरेव त्रिरात्रमित्युक्तं। द्वादशवर्षादि प्रतीक्षोत्तरं दाहे तु पुत्रादीनां सर्वेषां सपिंडा
नां त्रिरात्रमेवेति कल्पतरु। दिवोदासादयः बृहस्पतिः। यस्य न श्रूयते वार्ता यावद्द्वादशवत्स
रात्। कुशपुत्रकदाहेन तस्य स्यादवधारणात्। गृह्यकारिकायां तु। तस्य पूर्ववयस्कस्य विंशत्य
शीर्ध्वतः क्रिया। ऊर्ध्वं पंचदशाद्वाऽत्र मध्यमे वयसि स्मृता। द्वादशाद्वत्सरादूर्ध्वमुत्तरे वयसि स्मृता।
चांद्रायणत्रयं कृत्वा त्रिंशत्कृच्छ्राणि वा सुतैः। कुशैः प्रतिकृतिं दग्ध्वा कार्याः शौचादिका क्रियाः इत्यु २६
क्तं। अन्य इति। अन्यत्र सपिंडैः विप्रादीनां आशौचे सकृदेकवारम्। पिंडदानं सिद्धान्नमदनं भुंज
नं तावदाशौचं कुर्यात्। तेषां ब्राह्मणक्षत्रियादीनां यावदाशौचं तावदाशौचं कुर्यात्। यावत्तेषामाशौचं
शिष्टं। तावदाशौचकारी स्यादित्यर्थः। तथा च विष्णुः। ब्राह्मणादीनामाशौचे यः सकृदेवान्नमश्ना

ति तस्य तावदाशौचं यावत्तेषामाशौचअपगमे प्रायश्चित्तं च कुर्यादिति। इदं च कामतः। अकाम
तस्तु अंतर्दशाहे भुक्त्वान्नं सूतके मृतके तथा। अस्याशौचं भवेत्तावद्यावदन्नभुज इत्यंगिरसो
क्तं द्रष्टव्यं। प्रायश्चित्तं त्वाह मार्कंडेयः। भुक्त्वा तु ब्राह्मणाशौचे चरेत्सांतपनं द्विजः। भुक्त्वा तु क्ष
त्रियाशौचे तथा कृच्छ्रो विधीयते। वैश्याशौचे तथा भुक्त्वा महासांतपनं चरेदित्यादि वेदितव्यं।
आमान्नप्रतिग्रहे तु नाशौचं। किंतु प्रायश्चित्तमेवापक्वस्यात्कुर्यादिति वाजपेययाजिनः शेद्
त्रेति। प्रेतस्य सपिंडैः सह रोदने कृते एकरात्रमाशौचं तथा च पारस्करः। मृतस्य बांधवैः सार्द्धं
कृत्वा तु परिदेवनं। वर्जयेत्तदहोरात्रं दानं श्राद्धादिकर्म चेति॥ १५॥ जन्मन्यस्पृश्यता नो भवति
कुलनुवां मातृवर्जं पितृस्वस्रा नाद्यूर्ध्वं सचैलादपनिधनकृताशौचके त्वेत्रिभागे। पूर्वांशस्योप
रि उक्तमहतिचयदि संचायनं वृत्तमासीत्तो चेत्तस्योपरिष्टाद्यपञ्चस्वज्ययोर्दसियोरादलबोध्यं। स
र्वत्राशौचे अशुचित्वादेव सर्वेषामस्पृश्यत्वे प्राप्ते कश्चिज्जन्माशौचादौ तदपवादमाह जन्मनीति।
जन्मनि जननाशौचे मातृवर्जं सूतिका व्यतिरिक्तानां कुलनुवां सपिंडानामस्पृश्यता नो भवति।
सूतिकायास्तु यावद्दशाहमस्पृश्यत्वं। तथा चांगिराः। सूतके सूतिकावर्जं संस्पर्शो न निषिध्य
ते इति। पितृविशेषमाह। पितुर्जनिकस्य सचैला स्नानादूर्ध्वमस्पृश्यता नो भवति। ततः पूर्वं त्वस्पृ

स्य तैव। अन्येषां तु सचैलस्नानाचमनाभ्यामानन्तर्येण स्पृश्यत्वं नास्ति। तथा च संवर्त्तः। जा
ते पुत्रे पितुः स्नानं सचैलं तु विधीयते। माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुरिति। पुत्रपदात्क
न्योत्पत्तौ न स्नानमिति हारलतादयः॥ तन्न॥ पुत्रपदस्य निमित्तविशेषणत्वेनाविवक्षितत्वात् पु
मान्पुत्रो जायत इति पुत्रपदस्य कन्यायामपि प्रयोगाच्च। अत एव सूतके तु मुखं दृष्ट्वा जातस्य जन
कस्ततः। कृत्वा सचैलं स्नात्वा तु शुद्धो भवति तत्क्षणादिति ब्रह्मपुराणे वचने सामान्येनैवाभिधा
नमिति सांप्रदायिकाः। यदा तु। पितुर्मिथुनीभावात्मकः संसर्गस्तदा सचैलस्नानेऽपि दशाहपर्यंत
मस्पृश्यतास्त्येव। तथा चाङ्गिराः। नाशौचं सूतके पुंसः संसर्गं चेन्न गच्छति। रजस्तत्राशुचि ज्ञेयं तच्च पुं
सि न विद्यत इति। इदानीं मरणाशौचेऽप्यपसंकोचनमाह। अल्पेति। अल्पे निधनकृताशौचके अन्त
पतितादिमरणनिमित्ते त्रिरात्रादौ पूर्वांशस्य प्रपर्मशस्योपरि दृष्टं। अस्पृश्यत्वं नो भवतीत्यर्थः। तथा ता ५
च देवलः। स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः। शूद्रविट्क्षत्रविप्राणां यथाशास्त्रं प्रचो
दितमिति। मदनिबद्दशाहादिके मरणाशौचे दृष्टं प्रथमद्वितीयभागोत्तरमस्पृश्यता नो भव २१
ति। यदि प्रथमभागे संचायनमस्थिसंचयनं तच्चमासीत्कृतं भवति। इत्यर्थः। नो चेद्यदि प्रथमभागे
स्थिसंचयेनं न कृतं तदा समदिनादौ यदा तत्क्रियते तदा तस्योपरि अस्पृश्यतो नो भवतीत्यर्थः।

तथा च देवलः। दशाहादित्रिभागेन कृते संचयने क्रमात्। अंगस्पर्शनमिच्छंति वर्णानां तत्त्वदर्शि
नः इति। इदं तु कलौ निषिद्धं। अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव चेति कलिवर्ज्येषु स्मृतेः। अत्रा
स्थिसंचयनपदं तृतीयभागस्याप्युपलक्षणार्थमिति वृद्धाः। अपेति। अपेत्याधिकारांतरो गृहे
स्वदास्यां जातयोर्दासीदासयोः स्वस्वपिंडादिमरणे आप्लवोर्ध्वं सचैलस्नानानंतरमनन्यसा
ध्येकार्ये स्पृश्यता नो भवतीति संबंधः। तथा च शातातपः। भृत्यकर्मकराः शूद्रा दासीदासास्त
थैव च। स्नाने शरीरसंस्कारे गृहकर्मण्यदूषिता इति। दासत्वे दासाः पंचदश नारदेन दर्शिताः।
गृहेजातस्तथा क्रीतो लब्धो दायादुपागतः। अनाकालभृतस्तद्वदाहितः स्वामिना च यः। मोक्षि
तो महतश्चर्णाद्युद्धप्राप्तः पणेजितः। तवाहमित्युपगतः प्रव्रज्यावसितः कृतः। भक्तदासश्च वि
ज्ञेयस्तथैव वडवाहृतः। विक्रेता चात्मनः शास्त्रे दासाः पंचदश स्मृता इति॥२६॥ अन्येनोपा
त्तयोरुक्तत्रिरजनिचरणाद्दत्तदासादिकानां स्वाम्याशौचाहसंख्यासमदिनगमनादूर्ध्वमन्यत्त
स्तत्कं। आलेपत्येऽपि तस्मिन्नहनि निशि च तन्मंगलार्थेषु योग्याभ्यवशौचं सदा नो भवति यति
वनिब्रह्मचर्यस्थितानां॥ दासविशेषेणास्पृश्यत्वविशेषमाह। अन्येनेति। अन्येनोपात्तयो
र्गृहीतयोर्दासीदासयोस्त्रिरजनिचरणाद्दोरात्रयानंतरमस्पृश्यता नो भवति। तथा च

स्मृत्यंतरं। नचयस्त्वस्रयोगर्भदासोनकृदासस्यदासत्वविरिति। नकृदासगर्भदासव्यतिरिक्तानांपूर्वो
क्तानांदत्तक्रीतादिदासानांस्वामिनोयावन्त्याशौचदिनानितत्संख्यातिक्रमणादूर्ध्वमस्पृश्यता
नोभवति। तथा दासस्यस्वसाध्यकर्मण्येवयोग्यता नतु कर्माधिकारे। तथा सूतिकायाः दास्या
ःस्वप्रसवनिमित्तं मासमस्पृश्यत्वमित्येतदन्यशब्देनोच्यते। तत्सूक्तं स्पष्टं। तथा चांगिराः।
दासीदासस्त्वसर्वो वै यस्य वर्णस्य योभवेत्। तद्वर्णस्य भवेच्छौचं दास्या मासस्तु सूतकमिति।
दी अत्रवदत्तदासानांस्वसपिंडमरणेसत्यपिमासाद्याशौचेस्वाम्याशौचसंख्यासमदिनोर्ध्वं
स्वामिकार्येस्पृश्यहेतिहरदत्तः। तथा च बृहस्पतिः। दासांतेवासिभृतकाः शिष्याश्चैकत्रवा
सिनः। स्वामितुल्येनशौचेनशुध्यंतिमृतसूतके इति। वाचस्पतिमिश्रास्तु। स्वसपिंडमरणे
आशौचमेवस्वामिसमकालमात्रप्रतिपाद्यतइत्याहुः। तत्र। आशौचाद्भवादेनकालवि
शेषमात्रविधानस्यस्वसपिंडमरणएवप्रसक्तत्वेनैवाशौचसंकोचस्योचितत्वात्। इदानीं
जननाशौचेयत्कार्यंतत्रशुद्धिमाह। जातेइति॥ अपत्येजातेसतितस्मिन्नहनितस्याशौ २८
चकारात्षष्ठदशमदिनयोरपितन्मंगलाप्तेषु। तस्यापत्यस्ययन्मंगलंकल्याणंतदर्थं
सुदानपूजादिषुपित्रादयःसत्यप्याशौचेयोग्याःअधिकारिणोभवेयुरित्यर्थः। मंगल

पदं जातश्राद्धस्याप्युपलक्षणं। तथा च ब्रह्मपुराणे। देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां। आयां
ति तस्मात्तदहः पुण्यं षष्ठं च सर्वदा। त्रिषेते पुन कुर्वीत सूतके पुत्रजन्मनीति। तद्दिनरात्र्योश्च पु
द्विनालच्छेदात्प्राक्। प्राङ्नाडीछेदात्संस्कार पुण्यपार्थं न कुर्वीति। नाड्यां छिन्नायामाशौचमितिहारीतवि
चनात्। सर्वाशौचस्य पुरुषविशेषेणापवादमाह। विसर्वैर्षेति। यतिःसन्यासी। वनीवानःप्रस्थः ब्रह्म
चर्येस्थितः द्विविधो ब्रह्मचारी। एतेषां सपिंडजननमरणादीनिमित्तकमाशौचं सदा नो भवति।
अत्रचसर्वाशौचपदेन सपिंडसोदकनगिनेयादिनिमित्तकमेवाशौचं गृह्यते। नतु निर्हरणादि
निमित्तकमिति शिष्टाः। बृहस्पतिः। नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणां। नाशौचं सूतके प्रोक्तं शौ
वे चापि तथैव च। तत्र त्वेतावान् विशेषः सन्यासीनोसपिंडमरणादौ न स्नानं। ब्रह्मचारिणां तु त
द्दृष्टं दृश्यते। परंतु तच्छवस्पर्शानुगमनादिनिमित्तकत्वेनान्यथासिद्धमिति दिक्॥ २०॥ तत्तत्का
र्येषु सत्रिव्रतिमन्त्रपूतपवदीक्षितर्त्विक्स्वदेशचेशापस्त्वप्यनेककर्मनिपठन। निषकादिशिल्या
करणां। संप्राप्तेषु दानोपनयनयजनश्राद्धपुत्रप्रतिष्ठाचूडातीर्थचर्यायात्राजपपरिणयनना
फल्सवेषुतदर्थं॥ अथ कार्यविशेषेषु केषांचित्तात्कालिकी शुद्धिमाह। तत्तत्कार्येष्विति। आ
शौचं नोभवति। निसर्वेणसंबंधः। सत्री अन्नसत्रवान्। मुख्यसत्रस्य दीक्षितपदेनैवसिद्धेः। अ

तीर्थश्राद्धपारायणादिव्रतवान्। अनंतव्रतादिनियमवांश्च। नव्रतीनां व्रते इति विष्णूक्तेः। नृपः प्रजा
पालनाधिकृतोयः कश्चित्। नृपवानमात्यादिः। दीक्षितोयजमानः। तस्याभावश्च यथा सर्वमेवाशौ
चाभावः। तथाच माधवीये व्यासः। तदर्हति दीक्षितस्य वैविधस्य महामखे। स्नानं त्ववभृथे या
वत्तावत्तस्यन सूतकमिति। ऋत्विग्यथा गृह्यादिः। तस्य च मधुपर्कोत्तरमाशौचाभावः। गृहीतमधु
पर्कस्य यजमानाच्च ऋत्विजः। पश्चादशौचे पतिते न भवेदिति निश्चय इति प्राक्तनात्। अत एव वरा ति ५
भांडारः। चवर्णविरणपक्षेन्येषामाशौचेन्य आगमयितव्या इत्याह। एवं स्मार्तेतुल्याकोटि
होमादेर्वेपि मधुपर्के सति दोषाभावः। यत्तु प्रारब्धो वरणं यज्ञ इति तत्रापि मधुपर्कोत्तरं तेषामि
ति पितृचरणाः। वस्तुतस्तु। कर्माणि द्विविधानि। वरणवंत्यवरणवंति च एवं च वरणवत्स्वेव प्रा
रंभो वरणं यज्ञ इति वरणमारंभः। तत्रैव मधुपर्कोत्तरता। अवरणवत्सु तु स्त्रीयाद्यपदार्थकरणमेवा
रंभः। अत एव ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वतामिति स्त्रीयाद्यपदार्थकरणानंतरमेवाशौचा
भावकृत्। तथाच दर्शपूर्णमासयोर्वृतस्य होतुः सामिधेनीषु प्रवृत्तस्याशौचाभावउपपद्यते। २८
अन्यथातस्यापि स्यात्। मनुरपि। नच तत्कर्मकुर्वाणः सनाभ्योप्यशुचिर्भवेदिति। तेनाधाने द्विपशु
बंधादौ मंत्रवद्वरणाभावात्तेष्वेवंतीति निर्णयसिंधौयच्चिरवनं पत्न्यतत्रैव स्मार्तेषु तुलाकोटिहो

मादौ मधुपर्काभावेन्य आगमयितव्या इति लिखनं तदपि तेषां लौकिके वरणोक्ते आद्यपदार्थाभा
२२ वेवेदितव्यं। यदपि सोमयागादौ च वर्णवैर्ण्यपक्षेन्येषामाशौचेन्य आगमयितव्या इति नाध्यं तदपि
तेषां स्त्रीयाद्यपदार्थाभावविषयमित्येवं सर्वग्रंथानामविरोध इति वयं। तथा स्वदेशस्य विप्लवो
त्पातरूपसर्गैराजन्तयादिदर्शनेतथा। आपदि चान्नाभावेन कुटुंबपीडायां तन्निवृत्त्यर्थं प्रतिग्रहादौ आ
शौचे नेत्यर्थः। चोप्यर्थे। अनेकाः कृतीः वेदान्यठतीत्यनेककृतिपठनः। तथा भिषजो वैद्यस्य ना
डीस्पर्शादौ। तथा कारूणां सूपकारादीनां शिल्पिनां चैलनिर्णेजिकानां च तत्तत्कर्मणि आशौचं
न। तथा आतुराणां मुमूर्षूणां रोगिणां तदुपशमार्थदानादौ नाशौचं। तथाच प्रचेताः। कारवः
शिल्पिनो वैद्या दासीदासास्तथैव च। राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः। तथा दाने च उ
जादानादौ प्रारब्धेनाशौचं। तस्य चारंभः। नांदीश्राद्धं सेकल्पोवा। तथाऽग्न्युपनयनं। यज्ञेन च
तडागोत्सर्गकोटिहोमादौ श्राद्धे च प्रारब्धे आशौचं न। तथा च लघुविष्णुः। व्रतयज्ञविवाहेषु श्रा
द्धे होमेर्चने जपे। आरब्धे सूतकं न स्यादनारब्धे तु सूतकमिति। प्रारंभो वरणं यज्ञे संकल्पो व्र
तसत्रयोः। नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति। तथा युद्धे च संप्रारब्धे उपस्थिते तदु
पयोगिनि संग्रामे सपुरोहितराजानं संन्नाह्ययेदित्यादिके प्राप्तानि केषांचि होमादौ नाशौचं प्र

तिथ्या विल्वादेः। हर्जचोलौ कर्म। तीर्थयात्रा अर्थयात्रा च। तीर्थं च यात्रा चाशौचे आकस्मिकत्वा ती
र्थप्राप्तौ तेषां। विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि। न तत्र सूतकं तद्वत् कर्म यज्ञादि कारयेदिति।
पैठीनसिस्मृतेः। जपः पुरश्चरणादि स्तोत्रपाठः अविच्छेदेन संकल्पितहरिवंशश्रवणादि द्रष्टव्यं।
तथा च ब्राह्मे। गृहीतनियमस्यापि न स्यादन्यस्य कस्यचिदिति। कालनियमाभावे तु हेयमेवे
ति पितृचरणाः। परिणयनं विवाहः। उत्सवो रथयात्रादिः सीमंतादिर्वा। एतेषु संप्रारब्धेषु आ
शौचं नेत्यर्थः। याज्ञवल्क्यः। ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वतां। सत्रिव्रतिब्रह्मचारिदात
ब्रह्मविदां तथा। दाने विवाहे यज्ञे च संग्रामे देशविप्लवे। आपद्यपि च कष्टायां सद्यः शौचं विधी
यते। दक्षः। स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्तितं। आपद्गतस्य सर्वस्य सूतकेपि न सूतकं
मित्यादि तेषां। तथा वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनादिति याज्ञवल्क्यवचनाद
त्रहो४ ग्निहोत्रौपासनहोमादयः सूतके कार्या एव। औपासनहोमश्च श्रौतत्वं त्व हरदत्तः स्वाहाक ३०
पहृत्याभावे केनचिदाकाशाज्जुहुयादिति शाकल्येनोक्तमित्यूचुः केचिन्मितादिनः। तत्र श्रौतेक
र्मणि तत्कालं स्नानतः शुद्धिमवाप्नुयादिति स्मृतेस्त्यागमात्रे स्वस्य कर्तृत्वं इतरोऽन्यकेन श्रौते
स्मार्ते वा अन्यस्यैव कर्तृत्वं। सूतके मृतके चैव अशक्तो श्राद्धभोजने। प्रवासादिनिमित्तेषु हावये

त्र१ द्धुतं हापयेदिति बृहस्पतिवचनादिति विज्ञानेश्वरः। अन्ये तु नित्यानि निवर्तेरन् वैतानव
र्जं शालाग्नौ चैके न्य एतानि कुर्युरिति पैठीनसिवाक्यादौपासनहोमः पत्नैनेव कर्तव्यः। तत्रैषं
व्यवस्था। येषां वक्ष्यमाणो दशरात्रमहो मेपि नाग्निविच्छेदस्तैर्न कार्यो होमः। ते त्रिरात्राद्यैः स्व
ह न्यद्वारा कार्य एव। त्रिरात्रमहर्षय मानोग्निर्लौकिकः संपद्यत इति सुदर्शनभाष्यात्। तत्पर मे
वान्य एतानि कुर्युरिति प्रागुक्तं वचनमित्याहुः। अपरार्के तु श्रौतं सर्वं स्वयमेव कार्यं। कर्म
वैतानिकं कार्यं। स्नानोपस्पर्शनं नाक्रयमिति हारीतिये स्वयमिति विशेषणोपादानात्। स्मा
र्तं त्यागमात्रेतिरिक्तमन्यद्वाराऽपि कार्यं। कश्चित् प्रवासादौ तु धर्मादिरेव होमकर्त्ता स्यात् अन्य
न्यत्र तु स्मृतम्। तथा चास्मिन्पर्वण्य एतानि कुर्यात् पैठीनसिवाक्याद्वा करणीपि। सू
तके तु समुत्पन्ने स्मार्तं कर्म कथं भवेत्। पिंडयज्ञं चरुं होमं सगोत्रेण कारयेदिति। चरुः पु
रोडाशादिः। जाबालोपि। जन्महान्योर्वितानस्य कर्मत्यागो न विद्यते। शालाग्नौ केवलो होमः कार्य
४ ७ एवान्यगोत्रजैः। अन्ये तु गृहपरिशिष्टे पिंडहोमश्रौतस्तु कर्तव्यः स्वकालेन फलं न च। अकृतस्तु वये द्वा०
स्मार्तेसद्भावे कृतात्कृतस्यान्यद्वारैव स्मार्तहोमकत्वः। अकृत व्रीह्यादि। कृताकृततंदुला
हा दि। एवं च होमबयेन्न चरुं हापयेदिति बृहस्पतिवचनमपि स्मार्तहोमपरमेव न तु श्रौतहो
होमपरमित्युक्तं। तेन स्मार्त्तत्वेपि पिंडपितृयज्ञश्रवणाच्चरुंयादि नित्यमन्यद्वारा कार्यमेवाम

मि० प्राग

ब्रपिप्रसूदे न्ना।ग्निशुश्रूक्रियाइति।अग्निशुश्रूक्रियाइत्यभिधानादनग्निसाध्यानां दानादीनां निवृत्तिः।
अतएवोक्तं स्मार्त्तकर्मपरित्यागो रात्रेरन्यत्र सूतके इति विप्रो दशाहमासीत वैश्वदेवविवर्जित
इति शुक्लस्य वचनाद्वैश्वदेवनिवृत्तिः।हरदत्तेन तु तस्य श्रावनथायोप्रदात्मा अशुचिर्यद्दशाह
तिसूत्र कृता ब्रह्मयज्ञस्यैवाशौचमध्ये विशिष्य निषेधः वैश्वदेवकर्तृतार्थः।तेन यज्ञ्भचामाशौ
चमध्येपि वैश्वदेवोनुवर्तीत्युक्तं।निर्णयसिंधावप्येवं।तथा।सूतके मृतके चैव संध्याकर्म समाच
रेत्।मनसोच्चारयेन्मंत्रान्प्राणायाममृते द्विजः।तथा।सूतके मृतके कुर्यात्प्राणायाममंत्र
कं।तथा मार्जनमंत्रांस्तु मनसोच्चार्य मार्जयेत्।गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत्।मार्ज
नं तु न वा कार्यमुपस्थानं न चैव हि।इति।तेन सूतकेप्यमंत्रकप्राणायाममुक्त्वा मर्घ्यांतां संध्यां कु
र्यात्।मदनपारिजाते योगीश्वरः।संध्यां स्नानं त्यजेद्विप्रः सप्ताहं शूद्रतां व्रजेत्।तस्मात्स्नानं च संध्यां
च सूतकेपि न संत्यजेत्।एवं कन्यायाश्चाधायस्ते मूहूर्त्ते निराज्ञा वेचकूष्मांडहोम सूर्वकं विवाहहोमो
प्याशौचमध्ये कार्यः।तथा च विष्णुः।अनारब्धविशुद्धिः कूष्मांडैर्जुहुयाद्घृतं।गां दद्यात्पुच ३१
गव्याशीतत ऊर्ध्वांति सूतकीति।।१०।।नाशौचात्तायते स्फः पतितपतिसुतत्रलविद्वानि
नीपुरोत्सवाव्यारवंडिचौराश्रमरहितसुरापेयहीनोपगासु।संदर्पास्सुर्यविप्राह्नि तिपपंक्तिदि
वाकीर्त्तिकार्थैर्दतेषु स्वेच्छापूर्वं च यास्त्रज्वलनजलविषानाशकाद्यैर्मृतेषु।इदानीमेतत्फवि

विशेषादप्याशौचाभावमाह।नाशौचमिति।पतितासु।तथा।पतिघातिनीषु।सुतः।पुत्रभ्रश्च
सत्वोगर्भः स्थितस्य।ब्राह्मणोपि।ब्रह्म ब्राह्मणः।विदूकन्या सैस्त्रि विदूपतिं पूति मिति म
तुवाक्ये तपाद्दर्शनात्।नतु वैश्यः।तुल्सरत्वे मूलवचनानावाहिति वाजपेययाजिनः।कन्या
चोत्पन्नागर्भस्थिताच।तासु पत्यादिघातिनीषु स्त्री भ्रूमरस्तनास्तनासुवा।नाशौचाद्यन्नात
पःस्फः।तथा।दोषात्।पाखंडिनो वेदबाह्यलिंगधारिणः।चौराः सुवर्णापहारिणः।आ
श्रमरहिताः सत्यधिकारे अकृताश्रमविशेषपरिग्रहाः।सुरापेयाः।निषिद्धसुरापानर
ता।हीनोपगाहीनः शूद्रः।स्वापेक्षया जात्यादिहीनो वा तं गच्छंतीति ताः हीनोपगाः।तथा च।एते
षु एतासु च मृतासु प्रसूतासु वा नाशौचाद्यत्तानयः स्थित्यन्वयः।तथा च याज्ञवल्क्यः।पाखं
ड्यनाश्रितास्तेना भर्तृघ्न्यः कामगादिकाः।सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः इति।
अत्र लिंगमविवक्षितमिति वृद्धाः।तथा संदर्पात्वि गर्वात्।सर्पविप्रशास्त्रिणां क्षितिपरा
जानां ऊर्ध्वं गतेषु तेर्वैरीति तेषु नाशौचादितयःस्फ रिति पूर्वेणसंबंधः।तथा।स्वेच्छापूर्वं
शस्त्रेणज्वलनतो अग्निः।तथा जलं।तथा विषं।अनाशकम भोजनं।आदिशब्दादनेनाहं आ
त्मानं व्यापादयामीत्येवं प्राणनाशहेतवद्धंधनादयश्च परिगृह्यंते।एतेर्मृतेषु नाशौचा
ज्ञातयः इति सर्वत्र संबंधः।अत्र च सर्वाधिकानां पारवंड्यादीनां तत्तन्निषेधातिक्रमाद्दोषः।

रापु१

त्वन्नराधीक्षे श्रुत्व तस्माद्धन्न शुद्धं कामीमियात् । न संशयमस्त्यापतेद्दिति निषेधातिक्रमाद्दोषो
वगंतव्यः । तथा । त्वेव सर्वमिति विशेषणोपदानाज्जलादिनाप्रमादेन मरणे शौच मस्त्येव । त
था च गौतमः । प्रायो नाशक शस्त्राग्निविषोदकोद्बंधन प्रपतनैश्चेच्छतामिति । चसब्रह्मराणेपिश्ट
से४ गिदंष्ट्रिनखिव्यालविषवह्निक्रियाजलैः । मुहूरात्परिहर्तव्यः कुर्वन्क्रीडां मृतस्तु यः । नागानां वि
प्रियं कुर्वन्दग्धश्चाप्यथ विद्युता । निगृहीताः स्वयं राज्ञा चौर्यदोषेण कुत्रचित् । परदारान्हरं
तश्चैव पत्युस्तत्र निहताः । मस्तपातकिनो ये च पतितास्ते प्रकीर्तिताः । पतितानां न दाहः स्यान्ना
न्त्येष्टिर्नास्थिसंचयः । न चाश्रुपातः पिंडो वा कार्यं श्राद्धादिकं क्वचित् । एतानि पतितानां तु यः
करोति विमोहितः । तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा । तेष्वशुचिरसर्वी । अज्ञानेन कृत्वा नि
मुदकं स्नानं स्पर्शनं वहनं कृपांस्तदालंबनादाश्रुपातं च तप्तकृच्छ्रेण शुध्यतीति तत्तेयं । प्रमादमरणे
त्वाशौचादिकमस्त्येव । तथा चांगिराः । अपकार्यप्रमादेन म्रियंतां नष्टफलकादिभिः । तस्या ३२
शौचं विधातव्यं कर्त्तव्या चोदकक्रियेति । तत्र उद्मरणनिमित्ते दानादितु निर्णयसिंधौ ज्ञेयं । त
थावैधमरणेपि न दोषः । तथाह मनुः । वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः । आत्मा
नं घातयेद्यस्तु भृग्वग्न्यनशनांबुभिः । तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः । तृतीये तूदकं ये२
दत्वा चतुर्थे श्राद्धमाचरेदिति । इदं च वृद्धा । हिमरणं कलौ निषिद्धं । तथा च ग्निपतनैश्चैव वृद्धा

दिमरणं तथेति कलिवर्ज्येषूक्तेः । अत एव यथायुगानुसारेण संत्यजेदात्मानं तत्तद्गमिष्यत्क्तोऽते
नयैवैतन्नोविस्मृनं तीत्यादयः । प्रयागे मरणविषयो युगांतरपराइति धर्मतत्त्वविदः । तथा गो
ब्राह्मणादिहतानामाशौचादिनिषेधस्तदानीमेव । संवत्सराद्धूर्ध्वं तेषां सर्वमाशौचादि कार्यमि
वाततथा च षट्त्रिंशन्मते । गोब्राह्मणहतानां च पतितानां तथैव च । ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमे
वौर्ध्वदेहिकमिति । स्मृतिरत्नावल्यां तु । द्विगुणं प्रायश्चित्तं कृत्वा अर्वाग्प्यब्दात्सर्वं कार्यमित्युक्तं ।
पतितानां मोर्ध्वदेहिकं च नारायणबलिं कृत्वा कार्यं । तथा च छागलेयः । नारायणबलिः कार्यो लो
कगर्हाभयान्नरैः । तथा तेषां नवे शौचं नान्यथेत्यब्रवीद्यम इति । व्यासोपि । नारायणं समुद्दिश्य
शिवं वायव्यदीयते । तस्य शुद्धिकरं कर्म तद्भवेन्नैतदन्यथेति । गौडास्तु । शवं वायव्यदीयत इति
पाठाद्विष्णुरूपे शवं ध्यात्वेत्यर्थमाहुः । अत्र च । यद्यपि इंद्रियैरपरित्यक्ता येच मूत्रादिना दिना
घातयंति स्वात्मानं चंडालादिहताश्च ये । तेषां पुत्राश्च पौत्राश्च दययास मनिष्ठुताः । यथा शा
स्त्रं प्रतन्वंति विष्णुनामप्रतिष्ठितं मिति विष्ण्वादिवाक्ये रात्मघातिनीमेव नारायणबलिरुक्तस्तथा
३५ पि नित्तमात्रस्य संवत्सरादूर्ध्वं सिद्धेयः । तथा च बौधायनः । अपातोनारायणबलिं व्याख्यास्या
मो भिशस्त पतितसुरापात्मत्यागिनां ब्राह्मणहतानां चेत्यादि । प्रमादमरणे तु वस्तुमात्रं प्राय
श्चित्तं कृत्वा और्ध्वदेहिकं कार्यं । न तु नारायणबलिः । तथा च मदनरत्ने विष्णुः । एवं विष्णुमतेऽष्टि

ज्ञायोदध्याद्यात्मघातिने। समुद्र। तितत्तिप्रंनात्रकार्यविचारणा। अभूत्मघातिनिशाद्यः पतितमात्रो
पलन्नणार्थः। तथा च मदनरत्ने ब्राह्मे। प्रमादादपि निःशंकस्त्वकस्माद्विधिचोदितः। चांडालैर्म्ले
च्छैर्वैरैर्निहतो यत्र कुत्रचित्। तस्य दाहादिकं कार्यं यस्मान्न पतितस्तु सः। चांद्रायणं तप्तकृच्छ्रद्वये
तस्य विशुद्धये। यद्वा कृच्छ्रान्वं च दशकृत्वा द्वा विधिना दहेत्। वृद्धिप्रर्वेषु तानो तु त्रिंशत्कृच्छ्रं समाच
चा५ रेत्। यत्तु द्वादशवर्षाणि कुर्वीतेति प्रायश्चित्तं गुरुत्वं तत्तद्रूलस्याद्विष्टद्वष्टव्यं। इदं चात्मवधप्राय
दि ति५ श्चित्तं तत्कालातिप्रौवधप्रायश्चित्तेन समुच्चितं कार्यमिति गुरुचरणाः। तथा च प्रायश्चित्तेत्तरं नारा
यणबलिरितिदिक्। ॥१८॥ नाशौचं शाककाष्ठाजिनलवणतृणक्षीरनीरामिषेषु पुष्पमूलफ
लेषौषधिदधिमधुषु स्यात्तिलेषु त्वामनोऽन्ये। दद्यादद्यादि मानि स्वयमनु मनुना स्वामिनो या
नि न्यातिशौचे वा कृत्रिमे वापणितमपाणितं चापि सर्वेषु चिः स्यात्। इदानीं द्रव्यतः आशौचा व्य
पवादमाह। नाशौचमिति। एतेषु मध्येतेषु आशौचं न स्यादिति संबंधः। तथा। तिलेषु। इक्षुषु। आ ३२
मनोऽन्ये आमान्ने च आशौचं न स्यात्। इमानि शाकादीनि द्रव्याति याने मरणमिति यावत्। जाते जनने।
तथा कृत्रिमे निर्हरणादिनिमित्तके चाशौचे स्वामिनोऽनुमनना दद्यादद्यात्। स्वयमद्याच्चा त
था। पणितं विक्रियार्थं प्रसारितमपणितं तद्विपरीतं च शाकादिद्रव्यमतिरिक्तमपि पण्येवणि
जः आशौचे शुचिः स्यात्। तथा च मरीचिः। लवणो मधुमांसे च पुष्पमूलफलेषु च। शाककाष्ठ

क्षसु तृणेष्वप्सु दधिसर्पिःपयःसु च। तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः। पण्येषु चैव सर्वेषु नाशौ
चं मृतसूतके। स्वयंग्रहः स्वयमेव स्वाम्यनुज्ञया या ग्रहणं न तु धस्तादिस्पर्शः। कृपेक्षतत्व रक्षादपि नदो
षः पक्वं लड्डुकादि। अपक्वं तंडुलादि। एतत्पक्वापक्वान्नानुज्ञानमन्नसत्रप्रवृत्तविषयं त
था चांगिराः। अन्नसत्रप्रवृत्तानामाममन्नमगर्हितं। भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु पयः पिबे
दिति। अत्र पक्वान्नमोदनादि। नतु न तंडुलादि। तस्य ग्राह्यत्वोक्तेः। षट्त्रिंशन्मते अज्ञानात्
मपरिज्ञाते सूतकं नैव दोषकृत्। एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेत्। तथा च दातात्रातो
ज्ञान भोक्ता चाज्ञाते नोक्तदोषः। अन्यो ह्नुतसुरापानवत्तस्यैव प्रायश्चित्तं तत्तस्य निमित्तनिश्चयो
नि त्तरमित्येपेयं। तथा। विवाहोत्सवयज्ञेषु त्वंतरामृतसूतके। परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्त वं
मैः। भुंजानेषु तु विप्रेषु त्वंतरामृतसूतके। अन्यगेहोदकाचांताः सर्वे ते शुचयः स्मृताः। रह
स्पतिः। विवाहोत्सवयज्ञेषु त्वंतरामृतसूतके। पूर्वसंकल्पितान्नेषु न दोषः परिकीर्तितः। षड
शीतौ। संसर्गाद्यस्य चाशौचं यस्यातिक्रांतकालता। तदीयस्य पदार्थस्य नाशौचं विद्यते क्वचित्।
जु३ विष्णुः प्रोक्षणेनैव शुक्लकमिति। ॥२०॥ ज्ञातारण्याग्निना वह्निपरिणयनविधेः। धिराधानकालाद्
ह्रेणो ध्वंक्ति विध्याहिनकृतवहनैः जो किं केनाग्न्यभावे। चंडालाग्निं चिताग्निं पतितकृतभुजं स्मृति
कामेध्यवह्निं जह्याद्दग्ध्वाग्निहुत्वेन्धनदहनप्रवृत्ता येन दाहोऽपवादः। इदानीममेरुपादेयत्वानुपा

देयत्वाद्याह। ज्ञातारण्याग्निनेति। अर्वाक्परिणयनविधेः विवाहात्। दर्वाक् ज्ञातारण्याग्निना दग्धिः
दाहः। अयं च ज्ञातारणिकः लौकिकनिषिद्धः। प्राप्तार्थं द्विजाग्न्यालाभे अजारणिपरिग्रहस्ततः लौकिकाग्निव
ज्येष्ठकेः। विवाहोत्तरं। आश्रौताधानकालान्नाष्टहेणाग्निना दग्धिः श्रौताधानानंतरं विधिना आ
हिताग्न्येकृतवहनाः आहवनीयादयस्तैर्दग्धिः। एतेषां ज्ञातारण्यग्न्यानां हीमनावेल्लौकिका
ग्निना दग्धिः। तथा च वृद्धयाज्ञवल्क्यः। आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः। अना
हिताग्निरेकेन लौकिकेनापरो जनइति। यदा तु सर्वमारण्येनार्थ्यां मैत्र्यग्नयोऽत्रात्सादाविधु
राधानरहितस्य पश्चात्तस्याहिताग्नेर्लौकिकाग्निनैव दाहः इत्यकं प्राक्। लौकिके विशेष
माह चेडालाग्निमिति। एतां श्वडालादिसंबंधिनोऽग्निञ्ज ह्यात्। दाहार्थं नोपादद्यात्। तथा
च देवलः। चंडालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित्। पतिताग्निश्चिताग्निश्च न शिष्टग्र
हणोचिता इति। इंधनादौ विशेषमाह। श्वडाक्रु तेनेति। श्वडेण श्मशानं प्रत्यानीतेनेंधनग्रहणता
दैन। आदिशब्दात्तिलकुशादीनां संग्रहः। एतैः कृतो पि चैवर्णिकदाहः। अकृतएव। तेन तत्र ३४
दाहस्याहृत्तिः। श्वस्य चा दर्तुः प्रत्यवायः। तथा च मनुः। यस्यानयंति शूद्रोऽग्नितृणकाष्ठहवींषि
च। प्रेतत्वं हि सदा तस्य स चाधर्मेण लिप्यत इति॥२१॥ सर्वं स्त्रीनिरस्थ्युपनयनविधेः
प्राक्परं तु स्वशाखागृह्योक्तैस्तद्विधानैः सकलशबविधिं ज्येष्ठपुत्रोवरादिर्वा पुत्राभावे। क्रमे

इदानीं दहने विशेषमधिकारिणश्चाह। सर्वमिति॥२

णं स्वकृतजननीवंश्यशिष्यर्त्विजो वाचार्यो वापत्रकुर्यात्। अधमदिनविधिं सोपि तत्सूतकं तु।
तोऽपनयनविधेः प्राक् मृतस्य द्वादशदिन सर्वं स्त्रीमम त्रकं विदध्यात्। यमस्तु काद्विजपक्षन
वसेव। भवनने तु नान्यत्किंचिदौर्ध्वदैहिकं कुर्यात्। ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः इ
ति वचनात्। उदकग्रहणं प्रेतक्रियोपलक्षणार्थं। अत्र च यद्यपि स्त्री सेवोदकं कुर्यात्। स्त्री
संस्कारमेव च। सर्वेषां कृतचूडानाम न्यत्रापीच्छया द्वयमिति लौगाक्षिणोक्त्या स्त्रीमस्फ द्रकदा
नमात्रमुक्तं। तथाप्यसंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशेष्विति प्रचेतोवचनादवयव
पिंडादि त्र्यहाशौचे कार्यमेव। एवं द्वादशाब्दसराद्वर्वाक् पौगंडमरणे सति सपिंडीकरणांतस्या
देकोद्दिष्टानि कार्यमेदिति देवजवचनात्सपिंडनाप्राप्तावि सर्वं भवति। द्वादशाब्दसराद्वित्युप
पनीतद्विजान्नूर्ध्वं शूद्रविषयमिति पिन्चरणाः। स्त्रीणां तु उद्वाहात्प्रागुदकपिंडदानविकल्पः।
स्त्रीणां चैके प्रत्तानामिति गौतमवचनात्। स्त्रीशूद्राश्च सधर्माण इति वचनात्। श्वदेश्युद्वाहात्प्रा
गुदकपिंडदान विकल्पेइत्यन्ये। अत्र देवयाज्ञिकनिबंधे विशेषः। शिशुरादंतजननात् बालः स्या
द्यावच्छिशिखः। कथ्यते सर्वशास्त्रेषु कुमारो मौंजिबंधनात्। आपंचवर्षात्कौमारं पौगंडो नवहात्यै
नेयः। तथा गर्भेन्न हे क्रिया नास्ति उभदेयं शिशोर्मृतौ। परं च पायसं क्षीरं दद्याद्वालविपश्चितः। ए

काद्शाद्दशाहाद्वा वृषोत्सर्गं विधिं विना। यत्र प्रमीयते बालस्तत्र प्राय प्रदीयते। किंचित्समानवय
स्कांस कृत्वा लयपा विधीति। इदं च पंचवर्षपर्यंतमेव। तदूर्ध्वं तु सपिंडीकरणवर्जं वृषोत्सर्गादि सम
वं नवत्येव। तथा च—तत्रैव। पंचवर्षाधिके बाले विपत्तिर्यदि जायते। वृषोत्सर्गादिकं कर्म क
र्तव्यं मुदकं तनः। पायसेन गुडेनैव पिंडं दद्याद्यथाक्रमं। उदकुंभप्रदानं च पददानानि यानि
वा। कर्तव्यं तु खगश्रेष्ठ प्रेतावधिक्रिये तत्र सये। श्राद्धानि षोडशापि स्फः सपिंडीकरणं विनेति।
वार्षिकं तु न भवति सपिंडानाभावे पितृत्वायोगात्। इदं तु निर्मूलत्वात् प्रतारणमात्रमिति दि
क्। परमिति। उपनयनोत्तरं मृतेस्य शाखाग्रह्योक्त मार्गेण सर्वमौर्ध्वदेहिकं कुर्यात्। तथा च याज्ञ
वल्क्यः। गत्रपेतस्य दाहादि लास्याद्यन्तापर्वविदिति। अधिकारिणमाह। सकलेति। प्रथमदिनमारभ्य
दशाहांते शाबविधिं ज्येष्ठ पुत्रस्तदभावे तत्सन्निधौ अवरः कनिष्ठः कुर्यात्। तथा च सुमंतुः मा
तुः पित्रश्च कुर्वीत संस्थितस्यौरसः सुतः। पैतृमेधिकसंस्कारं मंत्रपूर्वकमादत इति। अयं
च ज्येष्ठासन्निधौ कनिष्ठस्याधिकारः दशाहांतमेव। सपिंडानां प्राग्माविष्टमासिकेषु एकाद ३५
शाहश्राद्धे चेत्यन्ये। तथा च निर्णयसिंधौ एकादशाहं प्रक्रम्य। इदं च एकादशाहकर्तृपुत्रेण वा
कार्यमित्युक्तं। अपरार्केपि। श्राद्धानि षोडशादत्त्वा न कुर्यात्सपिंडनं। प्रोषितावसिते पुत्रः का

ति

र्या दौर्वी विरादपीति वा यवीयनुपन्यस्यतानियदि कनिष्ठभ्रात्रादिना कृतानि तदा सपिंडनमेव
कुर्यादित्युक्तं। प्रोषिते नासितावसिते पितृमरणे काले सतीत्यर्थः। हेमाद्रिस्तु। एकादशाद्याः क्र
मशो ज्येष्ठस्य विधिवत् क्रियां। कुर्यान्नैकैकशः श्राद्धमाब्दिकं तु पृथक् पृथगिति। प्रचेतो वचनादे
कादशाहश्राद्धादौ ज्येष्ठस्यैवाधिकार इत्याह। यानि तु। यवीयसा कृतं कर्म प्रेतशाद्धादि यत्तु। त वि४
ज्यायसापि कर्तव्यं सपिंडीकरणं पुनः। तथा। मातापित्रोर्मृतेः काले ज्येष्ठे देशांतरं स्थिते। क
प्र निष्ठेन कर्तव्यं सपिंडीकरणं तदेस्यादी। ति वचनानि तानि निर्मूलानीति पितृचरणाः। केचित्तु।
यत्र ज्येष्ठः कनिष्ठश्चाग्निताग्निस्तत्र ज्येष्ठासन्निधौ कनिष्ठेन तु दिश्रौत पिंडपितृयज्ञार्थं कृते
पि सपिंडीकरणं ज्येष्ठेन प्रेतशाद्धरहितं तत्कार्यमित्येवं परं वचनद्वयमित्याहुः। पुनः कर तत्र८
णमानाभावाद्वचनद्वयस्य च निर्मूलत्वात्। सकलेत्यनेन दशाहांतं कर्म ते दोन कार्यमिति सू
चितं। तत्र। पुत्राभावे कर्तृविशेषमाह पुत्राभाव इति। पुत्रपदं चात्र गौणमुख्यपुत्राभिप्रायं।
पुत्रे विद्यमाने पुनान्यं वै कारयेत्। स्वधामिति ऋष्यशृंगवचनात्। यद्यप्यत्र पुत्राभावे स्वकुलज
इत्यविशेषेणोक्तं तथापि पुत्राभावे पौत्रस्तदभावे भ्रात्रादिरिति ज्ञेयं। तथा च विष्णुपुराणे। पुत्रः व२
पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसंततिः। सपिंडसंततिर्वापि क्रियार्हो नृप जायत इति। गौतमोपि।
पुत्राभावे शिष्याः सपिंडाश्च तदभावे तत्कुलजो गाचार्यविति। स्वकुलजपदं सोदकपरम

पि। तदभावे जननी वंश्यः शिष्यर्त्विजादयः प्रसिद्धाः। वस्तुतस्तु। प्रपौत्राभावे अविभक्तासंसृष्ट
भ्रात्रहीनस्य पत्न्यः पत्नी तस्या अभावे शंखः। पितुः पुत्रेण कर्तव्या पिंडदानोदकक्रिया। पुत्रा
भावे च पत्नी स्यात्पत्न्याभावे च सोदर इति। तथा भार्या पिंडं पतिर्दद्याद्भर्त्रे भार्या तथैव च। श्वश्र्वादे
४ स श्च स्नुषा चैव तदभावे सपिंडकाः इति। यत्तु न भार्यायाः पतिर्दद्यादिति वचनं तत्प्रपौत्रपर्यंतसत्त्वे तथा। तं॰
यद्यपि सर्वाभावे स्त्रियः कुर्युः स्वभर्तृणाममंत्रकमिति वचनं। यच्च कुर्वंत्येपि चोऽसन्नेष्वीनिः
कार्या क्रिया ह्यपेति विष्णुपुराणे तदासुरादिविवाहोढाविषयं। धर्म्यविवाहे दृष्टयासा पत्नीप
रिकीर्तिता। क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते। न सा दैवे न सा पित्र्ये दासीं तां मुनयो विदु
रिति शातातपोक्तेरिति निर्णयसिंधौ दिव्यचरणाः। केचित्तु विभक्तासंसृष्टभ्रातृसत्त्वेपि पत्न्या एवा
धिकार इत्याहुः। तन्न। पत्न्यार्धहरः सपिंडदायी स्यादिति विरोधात्। सर्वाभावे धर्मपुत्रो वा कार्यः। अ
पुत्रेण सुतः कार्यो यादृक्तादृक्प्रयत्नतः। पिंडोदकक्रियाहेतोर्नामसंकीर्तनाय चेति व्यासवच
नात्। असगोत्रः सगोत्रो वे स्तुदारा हर्तव्यवचनाच्च केचित्तु सर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रि ३६
याः। त्रिप्रकाराः क्रियाः प्रोक्तास्तासां भेदं शृणुष्व मे। आद्या द्वादशाहाद्य मध्ये यास्यक्रिया मता
ः ताः पूर्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिताः। प्रेते पितृत्वमापन्ने सपिंडीकरणादनु क्रियंते
याः क्रियाः पित्र्याः प्रोच्यंते ता नृपोत्तराः। पितृमातृसपिंडेष्वसमानसलिलेष्वपि तथा। तत्संघातग

नृ॰ ३ २

तेष्वेव राजाराधनकारिणा। पूर्वा मध्या च कर्तव्या पुत्राद्यैरेव चोत्तरा इति। महानिबंधधृतविष्णुपुरा
णादिवचननिचयवशान्मध्या क्रियांतः पाति निसपिंडीकरणे च काराद्दशाहादि पूर्वक्रियाकर्तु
र्यस्याप्यधिकारः। यत्तु एकादशाद्याः क्रमश इति ज्येष्ठाधिकारप्रतिपादकं वचनं तत्पूर्वक्रियाक
र्तुर्नाशे संनिधौ वा ज्ञेयमित्याहुः। इदं च पूर्वविराधाभिन्नं स्यादिति दिक्। देशानियममाह। यत्रोत्तिय
त्र प्रपमादि न कृत्यं कृतं तत्रैव दशाहकृत्यं समापयेत्। तथा च विष्णुः। गृहद्वारे [illegible] नेच्चसमर्थो श॰
देवगृहे गोष्ठा। यत्राद्यो दीयते पिंडस्तत्र सर्वं समापयेदिति॥२१॥ इदानीं खननादि निर्णयमाह। आ
नामः स्नानमात्रं न जलक्रतवद्रोनामवर्षत्रयांतः कार्मचो [illegible] नित्यो भवतच परतेचौलकेचौल
युक्ते। नित्योक्तावि शेषादपपितृमुखराः स्नापयित्वांबरस्रग्गंधाद्यैः शोज्ञपित्वा भूतमपरवने
नेयोग्यमास्येर्विलिप्या नामकरणाप्रांकनपरते मृते मृतेवा लेखनमात्रं। मात्रशाहार्पमाह। न
जलक्रतवद्दाविति। जलादिग्रहणं। पिंडदानस्याप्युपलक्षणं। नामच वर्षत्रये च। नामकरणमा
शं.१ रभ्य तृतीयवर्षपर्यंतमित्यर्थः। जलक्रतवद्रोपादिकत्वेनानुष्ठेयो न तु प्राग्वच्चयो निषेधः। त
था च मनुः। नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया। जातदंतस्य वा कुर्युर्नाम्नि वापि कृते सतीमि
ति। लौगाक्षीरपि हुल्ली मेवोदकं कुर्यात्ति हुल्ली संस्कार [illegible] च। सर्वेषां दंतजन्मनामन्यत्रपी [illegible] याद्य
मिति अस्मिंश्च लौगाक्षीवचने सर्वग्रहणाद्दूनद्विवर्षं निखनेदिति सामान्यवाक्यप्राप्तदाहापवा
दत्वेनोनद्विवर्षस्य कृतचूडस्यापि दाहः पक्षे विधीयते इत्यन्यत्र तुलं। जलादिग्रहणस्योपल

त्र्यणत्वात्पिंडदानमपि पाक्षिकं। ऊर्ध्वं वर्षत्रयानंतरं कृतचूडे अकृतचूडे च कालविशेषान्नलकु
तवह्नौ नित्यो। खनने विधिमाह। अथेति। पितृमुखराविह मुख्याः प्रेतं पुत्रादिः स्नापयित्वा अंबर
स्रग्गंधाद्यैः शोभयित्वा आप्त्येन। विलिप्य निखनेदुरिति शेषः। इदं च स्रग्गंधादिनिरलंकरणं
दहनापि तेषां। तथा च प्रचेताः। स्नानं प्रेतस्य पुत्राद्यैर्विलिप्याद्यैः स्रजं नेतनः। न मरे हंस दहे नेव किंचि
द्देयं परित्यजेत्। किंचिद्देयमिति शववस्त्रैकदेशं श्मशानवासिने देयमित्यर्थः। तथा। दिनत्र
तस्य रात्रौ दाहो न कार्यः। तथा च यमः। संध्यायां वाप्यथा रात्रौ दाहं पाप्येय कर्म च न वर्णश्राद्धं च नो
कुर्यात्कृतं निःफलतां व्रजेदिति। रात्रिमृतस्य तु संग्रहे। रात्रौ दग्ध्वा तु पिंडांतं कृत्वा वपनवर्जि
तं। वपनं नेष्यते रात्रौ श्वस्तनी वपनक्रियेति। एतत्प्रसंगात् कं॥ २२॥ प्रत्यग्द्वारा नगर्याश्च। दक्षिण
निसुरं तु क्षत्रियं तूत्तरेण प्राग्द्वारेणैव वैश्यं पितृदिशि वृषलं नापयित्वा अनुयायुः। वर्णीयः शूद्रमू
न द्विशरत्परतो नानुयाने नियामः। शूद्रे स्पृष्टोपचोदोयद्दिनवति मृतः प्रेतभावान्न मुक्तिः॥
इदानीं वर्णविशेषेण द्वारविशेषमाह। प्रत्यगिति। नगर्याः प्रत्यग्द्वारा पश्चिमद्वारेण विनिसुरं प्रेतं
ब्राह्मणं। उत्तरद्वारेण क्षत्रियं। प्राग्द्वारेणैव वैश्यं पितृदिशि दक्षिणदिशि। वृषलं शूद्रं वहिनापयि ३७
त्वा वाहित्वा निःसार्य विशेषीयः शूर्वे हृदुग्रः सरं यथा नवत्येव मनुयापयुर्वग्गच्छेयुः। प्राग्द्वारेणेति
समस्तमपि द्वारपदं बुध्यानि षूध्यस्त। क्षत्रियं तूत्तरेणेत्यत्र पितृदिशीत्यत्र संबंधनीयं। तथा च म
नुः। दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्। पश्चिमोत्तरपूर्वैस्तु यथासंख्यं द्विजातयः इति। व

स्कृतत्वाद्दाक्षिणेन मृतं शूद्रमिति पूर्वार्धे शूद्रोपक्रमस्य प्रतिलोमक्रमनियामकत्वात् मंगलत्वे
न प्रतिलोमक्रमस्यैवोचितत्वाच्च मनुक्तेनुक्रमाभिधानं चिंत्यमेव। तथा च पश्चिमद्वारेणैव विप्रे
उत्तरद्वारेण क्षत्रियं प्राग्द्वारेण ब्राह्मणमित्येवं क्रमो ज्ञेय इति गुरुचरणाः। अत एव दिवोदासे
न। प्रागुदक्पश्चिमद्वारैरिति। प्रतिलोम्यानुसारेणैव पाठो धृतः। यस्यां तु नगर्यां द्वाराभावः।
पत्रवा एकद्वारता तत्र न नियमः। हारीतः। न ग्रामात्सुखं प्रेतं हरेयुरिति। मृतग्रहणाज्जी
वतो वयने दिङ्नियम इति दिक्। इदानीं क्वचिदनुगमननियमापवादमाह ऊनेति। ऊनद्विवा ऊ
र्षिकं मृतस्यानुगमने नियमो नास्तीत्यर्थः। तथा च याज्ञवल्क्यः। ऊनद्विवर्षं निखनेन्न कुर्या
दुदकं ततः। आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्वृतो इति। इतर ऊनद्विवर्षातिरिक्तोनुव्रज्य इ
ति नियमाद् ऊनद्विवर्षे नियमः सिद्धो भवति। इदानीं प्रसंगात् शूद्रस्य तयोः स्पर्शनिवहनयोर्दोष
५ ष्टः। माह शूद्रेति। मृतस्यैव र्णिकिः शूद्रैः स्पृष्टः। अपाकृष्टो भवति तदा मृतस्य प्रेतभावान्मुक्तिर्न
त्यर्थः। तथा च मनुः। न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत्। अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्र
संपर्कदूषितेति। विष्णुः। मृतं द्विजं न शूद्रेण हारयेन्न शूद्रं द्विजेनेति। रथशिबिकादिना वहने
तु न दोषः। तथा च प्रचेताः। रथ्यापर्यंत्यन्लसितं प्रेतं नमेकान्मि चक्रवादिषु। शिबिकायां विमाने वा
प्रचेतो वचनादिदेति। शूद्रस्पर्शादौ कृच्छ्रत्रयं प्रायश्चित्तमिति। तातचरणाः। शूद्रेण दाहे

गुञ्जाबालिः। श्वडेलाद्ग्धो योविप्रो ब्रह्मन्नेच्छाधतीगतिं। प्रायश्चित्तं प्रकुर्वीत ब्राह्मणः पापशुद्धये।
चान्द्रायणं पराकं च प्राजापत्यं विशोधनमिति॥२४॥ ज्ञातीनां मातृपित्रोरपि परमगुरोर्नित्यमं
जोपनिवृत्तमन्नात्सचस्त्रीय याज्यश्वशुरगुरुसुहृद्याजकानां यपेक्षं। नन्वात्मब्रह्मचारित्वं यतिप
न निर्हरीब पात्स्वंडे चौरादवध्यैत्वित्रपिंडानन्जलजलकथनानर्हकास्तेऽस्य कौ। इदानीमुदकदा
३८ नेविशेषमाह। ज्ञातीनामिति। ज्ञातीनां सपिंडसोदकादीनां तथा मातपित्रोः परमगुरोराचार्यमा
तामहस्य। अपिशब्दाद्देप्रयोर्द्धि हि ज्ञनगिन्योर्नित्यमंजः उदकदानं। नित्यमित्यर्थः। तथाच वसि
ष्ठः। शरीरमग्नौ संयोज्यानिवेदयमाना अपोऽभ्यवयंति सव्योत्तराभ्यां पाणिभ्यामुदकक्रियां कुर्व
तीति। याज्ञवल्क्योपि। सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयंत्यपः। अपनः शोशुचदघमनेन पितृद
ङ्मुखाः। सकृत्प्रसिंचंत्युदकं नामगोत्रेणवाग्यता इति। सप्तमाद्दशमाद्वा आसप्तदंतमित्यर्थः। इति
विज्ञानेश्वरः। सप्तमान्मुख्यवादशमाद्वा यावत्संबंधमनुस्मरेयुरिति। पारस्करवचनात्। सप्त
माद्दशमाद्वामुख्यवादिति कात्यायनः। अत्र च स्नान[illegible]यामपि प्रधानत्वादुदकदाने नैवमं ३८
त्रस्यान्वयो मंत्रस्नानेन तस्य गुणत्वादिति केचित्। हेमाद्रिस्तु। अपनः शोशुचदघमिति दशि
णाभिमुखानि मज्जंतीति पारस्करवचनात्। स्नानांगमेवायं च मंत्र इत्याह। अपनइति वाम
हस्तेनानामिकया नवजोऽइनमिति हारलतादयः। प्रेतस्नानेन चाविशेषः शुद्धिलतो। आदौ

वस्त्रं तथा स्नात्वा तैर्नैवाच्छादितैस्ततः कर्त्तव्यं तैः सचैलं तु स्नानसर्वमलापहं। पूर्वपरिहितं वस्त्रं प्र
क्षाल्य पुनः परिधाय हीनवचनेन ज्ञानादच्छानपरं। निर्णयसिंधौ सचैलस्नानं ततः स्नात्वा शुचिर्भय
तमानसः। पाषाणे तत्र आदाय विप्रो दद्यात् दशांजलीन्। द्वादश क्षत्रियो दद्याद्वैश्यः पंचदश स्मृताः।
त्रिंशच्छूद्राय दातव्यास्ततः संप्रविशेद्गृहमिति। नरसिंहजेनउदकादि द्विरुक्ता। आशौचांतं प्रद
द्यात्तु प्रेतपुत्रस्तिलांजलीन्। प्रथमेह्नि सकृद्द्यात् पिंडयत्नात्स्वला दिवा। त्रीन्दद्याद्द्वितीयेह्नि तृ
तीये पंच एव च। चतुर्थे सप्त संख्याताः पंचमे नव चोत्सृजेत्। षष्ठेह्नि चैकादशकाः सप्तमे तु त्रयोद
श। अष्टमे पंचदशका नवमे दश सप्त च। एकोनविंशतिं चाग्ने शतांजलिमतं। केचिद्दशांजलीन्त्रो
नो८ चुः केचिदाहुः शतांजलीन्। पंचपंचाशतं चान्ये स्वशाखोक्तं व्यवस्थयेति। केचित्तु प्रथमे एकः। द्वि
तीये द्वौ तृतीये त्रय इत्येवमंजलिवृद्धिरुक्ता। प्रचेतसा च हमंजलित्रयमुक्तं। बह्वृचानां प्रत्य
हमेक एवांजलिः। तथा चाश्वलायनगृह्ये कौचिदुदकदानं सव्यावृतो व्रजंत्यनीक्षमाणा यत्रोद
कमवहज्जवति। तत्प्राप्य सकृदुन्मज्ज्यैकांजलिमुत्सृज्य तस्य गोत्रं नाम च गृहीत्वेति। अत्रांजल्य
नुवादे नैकत्वविधानं विकृतावर्द्धित्वात्तुवादच्चन्नित्य नर्पणेपंजलित्रायकमिति वयोच्यत एवा
स्मादेव सूत्रान्नित्यतर्पणे आश्वलायनानां गोत्रप्रापमामितिवृद्धाः। तेनाचारव्येन सव्येनदक्षि
णेन पाणिना बद्धस्य तर्पयेदित्यादिपदा श्वलायनस्मृतिस्थवचनेतदनाकरस्थमित्यनुसंधे

धेयं। याज्ञवल्क्यः। एवं मा॰ तामहाचार्यप्रेतानामुदकक्रियेति। अत्रैकशेषेण मातामह्या पितृष्वसेयेन्य
त्रविंशतिः। इदानीं क्वचिदुदकदाननिषेधमाह वर्गं हि स्मृत्येति। प्रत्यादुरिद्विजगिन्यादयः। गुरुरुपाध्या
यः। सुहृत्संबंधी मातुलमातृष्वसृश्वशुरादिः। अन्ये प्रसिद्धाः। एतेषां मित्रादिप्रजकानां तानां यच्चेतं। प्रे
तान्प्रत्युदककामना यांसत्योदयं मन्यत्रान्यथाने त्यर्थः। तथा च याज्ञवल्क्यः। कामोदकं सखिप्रत्तास्वस्री
यश्वशुरर्त्विजामिति। केषांचिदुदकानां दानेकर्तव्यतापवादमाह। न ब्रात्येति। ब्रात्यः सावित्रीपति
तः। अन्ये चौरतः प्रसिद्धाः। एते प्रेता योदकं न दद्युरित्यर्थः। तथा ये पिंडानलदाने किंचकुर्वना
स्पर्शवहनादावनर्हकाः। अयोग्यास्तेषुदकानिदिनदद्युरित्यपि श्नाशौचाज्ञात यः स्फुरित्य
नोक्तमित्यर्थः। तथा च स्मृतिः। न ब्रह्मचारिणः कुर्युरुदकं पतितानां तथैवेति। छंदमनुरपि। स्त्री
बाधानोदकं कुर्युस्तेनाब्रात्या विधर्मिणः। गर्भभर्तृद्रुहश्चैव सुरापश्चैव योषित इति। तथा। पत्नेः
किंचित् न कर्तव्यं न चान्येषां करोति स इति वचनाद्यतेरप्युदकदानं कार्यमित्यन्यत्र विस्तरः। ॥२५॥ २६
संस्कृत्या नीतमाणः सकलकुलबांधवो बालवृद्धैर्वर्ज्जिताः आदेये द्रव्ये सर्वेऽपि प्रसिद्धवसना एकवा
रं निमज्ज्य पाषाणोऽत्रिः सकृत्प्रतिदिनमुदकं ब्राह्मणेदक्षिणास्याः चक्रेरदङ्मुखावैश्यतवति
विशिष्टप्राङ्मुखोदादीरन्। तदुदकदानमिच्छंकर्तव्यमित्याह। संस्कृत्येति। सकलाः कुलबांधवा
तप। प्रेतं संस्कृत्य दाहयित्वा संस्कारस्थानमनीतमाणः संनो बालवृद्धैकनिष्ठपुरः सरं नदी

स्रे२

उ॰क॰४

संबंधीयपयः समीपं व्रजित्वा तस्मिन्स्वपयसि सर्ववसना एकवारं निमज्ज्य स्नात्वा तीरमागत्य पा
षाणोऽन्निः सकृत् प्रतिदिनमेवमाशौचसमाप्तिपर्यंतं प्रेतस्य नामगोत्रे उच्चार्य तिलोदकं द
व२ दीरन्। एतावत्सर्वेषां समं वर्णभेदे न विशेषमाह। ब्राह्मणो मृतवति दक्षिणास्याः क्षत्रे मृतव द३
ति उदङ्मुखाः विशिवेश्ये मृतवति प्राङ्मुखोदादीरन्। श्द्रत्वेनियमः। तथा च बौधायनः। प्रे वा॰
तमरण्यं हृत्वा यथोक्तमग्निं गमयित्वाऽनवेक्षमाणा आयांत्येकवाससः कनिष्ठपूर्वा इति। अरण्यं
श्मशानं प्रचेता अपि। प्रेतस्य बांधवा यथा वृद्धमुदकमवतीर्य नोदकं धर्षयेयुरुदकांते प्रासिं
चेयुरपसव्ययज्ञोपवीतवाससो दक्षिणामुखाः ब्राह्मणस्यं उदङ्मुखाश्च राजन्यवैश्ययोरिति।
तथा। नदीतीरांततो गत्वा शौचं कृत्वा यथार्थवत्। वस्त्रं संशोधयेरादौ ततः स्नानं समाचरेत्। सचै
लस्तु ततः स्नात्वा शुचिः प्रयतमानसः। पाषाणं तत आदाय विप्रेर द्वादशोज्वलीत्। द्वादश क्षत्रिये
दद्याद्वैश्ये पंचदश स्मृताः। त्रिंशच्छूद्राय दातव्यास्ततः संप्रविशेद्गृहं। ततः स्नानं पुनः कार्यं गृह
शौचे चकारयेदिति। स्नानगृहप्रवेशयोर्यः क्रमाश्रुरोधेन। विपरीतः क्रमो ज्ञेयः। नाद्येयुक्तिय
त्र गंगादिमहानदी तद्विषयो। यत्र पुनस्तादृशी नदी तत्र तडागादौ। स्थिरजल एव स्नानादि कार्यं ८३
तथा चाश्वलायनः। यत्रोदकमवरुद्धवतीति। दाहानंतरं च चितामप्रदक्षिणमावर्त्य जलं निक
टेगंतव्यं। तथा चाश्वलायनः। सव्यावृतो व्रजंत्यनीक्ष्यमाणाद्वितीयदकदाने चा तिलकुशायुतं कार्यं।

कृशाश्चस्नानवदेव। नत्वद्भिर्गुणान्वुमाः। सपिंडीकरणं यावद्दन्तुदर्नैः पिण्डक्रियेति विष्णुपुराणवच
नात्। तेनोदकदाने पत्रत्रयं। प्रत्यहमेकैकोंजलिः। यद्वान्वहमंजलित्रयं। यद्वांजलिवृद्धिरिति। त
त्रातिरात्रे षोडशिग्रहणवत्कुरुपक्षानुष्ठाने प्रेतोपकारः यस्त्वंकल्प्यत इति वृद्धाः। अस्मिंश्चोद
कदाने स्मृतिषु नामानामंत्रा उक्ताः। यथा प्रचेतसा प्रेतस्त्वप्यत्विति। क्वचित्तु मुखे सुखधेति। पारस्करे
णास्वसावेतत्तेउदकमित्युक्तं हारीतेन त्वसौ तृप्यतामित्युक्तं। कात्यायनेन तु गोत्रनाम पदान्ते च
तर्पयामीत्युक्तं। रामायणे तु। इदं पुरुषशार्दूल विमलं दिव्यमक्षयं। पितृलोकेषु पानीयं मद्दत्तमु
पतिष्ठतामिति मंत्र उक्तः। एतेषां च मंत्राणां तत्तद्देशाचारतो विकल्पो ज्ञेय इति दिक्॥२६॥ स्नायुर्न
योपितत्र त्रिनिशमनशनाज्ञातयो ह निशिं वा क्रीतोत्पन्नाशना वा मिश्रलवणपयः स्तारमन्नं स्य
जेयुः। स्त्रीसंगं मंगलानि व्यसनहसनमुद्वोद्वनाचासनानि ताम्बूलं ति तेन तेषु पगातिनियताः
संविशेयुर्निशायां। उदककर्दनानन्तरं कर्त्तव्यमाह स्नायुरिति। ज्ञातयस्तस्मिन्नेव पयस्विन्यूयोपिपा
पाणो उदकदानानन्तरमपि स्नायुः स्नानं कुर्युः। तथा च सर्वभुक्ते ततः स्नानं पुनः कार्यं गृहशौचं ४०
च कारयेद्विति। स्नायुरिति सर्वे ज्ञातयः सहस्नायुरित्यर्थ इत्यन्ये। अपि शब्देन सकलस्सर्व स्ना
न धर्मातिदेशः। मरणाशौचिनां विधिप्रतिषेधरूपान्धर्मानाह त्रिनिशामिति। त्रिशनिशमहर्नि
शं वा अनशनाः उपवासिनस्युः। पक्षान्तरमाह क्रीतमिति। क्रीतं तदानीमेवापणादानीतं।

वत्सन्नमपा। चितलन्धां वा। अशनं येषामेवं भृता न वेयुः। ते च आमिषं मांसं लवणं सामुद्रसैंधवा
दि पयः कुर्ष्यं स्नारं च गोधूमाद्यन्नं वर्जयेयुरित्यर्थः। वसिष्ठः। गृहान्व्रजित्वाथ प्रस्तरे त्र्यहमनश्नंत
आसीरन्क्रीतोत्पन्नेन वा वर्त्तेरन्निति। आश्वलायनः। नैतस्यां रात्र्यामन्नं पचेरन्क्रीतोत्पन्नेन
वा वर्त्तेरन्निति। क्रीतलब्धं चैकाल्यमेव भोक्तव्यं। क्रीतलब्धाशना वान्यगृहादेकाल्यमलवणमे
केरात्रिं कुर्वीरन्निति वैजवापवचनात्। आशौचमध्ये भोजनं च ज्ञातिभिः सह कार्यं। आशौ
च मध्ये यत्नेन भोज्यमेव स्वगोत्रजानिति वात्स्यात्। मरीचिना तु। प्रथमेह्नि तृतीये च सप्तमे नव
मे तथा ज्ञातिभिः सह भोक्तव्यमेतत्प्रेतेषु दुर्लभमिति। दिनविशेषे सहभोजनमुक्तं तत्त्वनो
जनं दिवैव। दिवा च नक्तं भोक्तव्यममांसमनृज्जयमर्षणे इति विष्णुपुराणात्। आपस्तंबेन तु ज्ञाना
र्यपरमगुरुसंस्थायां चाकालं भोजनानि कुर्युरित्युक्तं। यदा स्मृतिः परदिने तत्कालं इत्यर्थः। दा ५
तथा। लवणक्षीरमाषान्नापूपमांसानि पायसं वर्जयेदाहृतान्नेषु। बालहृष्यैरैविंति। ने ५
मधुः। अक्षारालवणान्नास्युर्निमज्जेयुश्चते त्र्यहं। मांसाशनं च नाश्नीयुः शयीरंश्च पृथक्क्षिति
तावित्ति। निमज्जेयुरिति मार्जनरहितं मज्जनमात्रं कुर्युरित्यर्थः। क्षारास्त्वक्ताः हेमाद्रौ। ति
लमुद्गादन्यच्छिंब्यं सस्यं गोधूमकोद्रवौ धान्यकं देवधान्यं च शमीधान्यं तथैव च। खिन्नधा
न्यं तथा पण्यं मूलं क्षारगणः स्मृतः इति। नचाधःस्त्रीसंगो मैथुनं। मंगलान्याद्दर्शदर्शनादीनि। व्या

स्नानादि तानि। कुसनं हास्यं। सुरं संतोषं तथा वर्जिताः। अत्ताराजवणान्नास्फजंथ्यकीनाश
नास्तयेति। दीनाइति हर्षहास्यादिनिषेधः। मलिनाइति दशाहपर्यंतं धृतानां वस्त्राणां त्या
नि३ जननिषेधः। एवं वर्णोत्विकादिहस्तेत्याजनार्थवस्त्रसमर्पणरूपस्यापि गोपि नवमदिन एवा
तदुक्तं। नवमे वाससां त्यागो नखरोमाणां तथांतिम इति। अस्य पुराणे दशमदिन एव वस्त्र
शुद्धिर्विहिता। यस्य यस्य तु वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः। स तत्र वस्त्रशुद्धिं च गृहशौचं च कु
र्यात्तथेति। पिंडदानाद्यौर्ध्वदेहिकसमये धृतस्य वस्त्रस्य त्याग एव न तु परिहतिः। तथा च ब्र
ह्मपुराणे। ग्रामाद्बहिस्ततो गत्वा प्रेतस्पृष्टे तु वाससी। अंत्यानामाश्रितानां च त्यक्त्वा स्नानं कुर्या
त्तथेति। भोगवर्जिताइति द्रष्टव्यातिवाक्ये च भोगशब्देन स्रक्चंदनाभ्यंगतांबूलादिसंग्रहः। तन्मि
तिर्ज्ञेयं। यत्तु तैलाभ्यंगो नरो धाय अंगसंवाहनं च यत्। तेन चाप्यायते प्रेतस्तुर्यं चाश्नंति स्ववांध
वा इति मार्कंडेयपुराणीयमभ्यंगप्रतिपादकं वचनं तद्दशमदिनपरं। आशौचांते कृतश्मश्रुक
र्माणस्तिलकल्कैः सर्षपकल्कैश्च स्नाता गृहं प्रविशेयुरिति विष्णूक्तेः। विष्णुपुराणे तु स्त्रीसं ४१
गमतिरिक्तस्य शय्यासनादिभोगस्यास्थिसंचयनावधित्वमुक्तं। तथा च तत्रैव शय्यास
नोपभोगस्तु सपिंडानामपीष्यते। अस्थिसंचयनादूर्ध्वं संयोगस्तु न योषितामिति। सपिं
डग्रहणात्पुत्रस्य यावद्दशाहं निषेध एव। दशाहं कर्तुमुपासीतेति मातापित्रोर्मरणइतिवो

ध्र्याश्च यद्यप्ययमर्थो विगम्यते। तथापि विप्रेतेभ्यः सर्ववर्णेभ्यः पिंडान्दद्याद्दशैवास्त्विति ब्रह्मपुरा
णवाक्याद्दशानामेव पिंडानां शिरःप्रभृत्यवयवनिष्पत्तिरूपप्रयोजनाभिधानाच्च सर्वे
षां दशैव पिंडाः। अत एव याज्ञवल्क्याशौचव्याख्याने स्तु वर्णानां क्वचिदेव हि दिशधर्मा
सुरक्तत्वमेतपिंडान्वपंत्यपीति श्रोक्तसंख्यायाः देशविशेषविषयत्वमभिधाय ब्राह्म
णस्याविच्छेदे नैव पिंडदानं तदन्येषु तु दशमपिंडोत्कर्षकं क्षः। देयस्तु दशमपिंडो राज्ञां वै
द्वादशेऽहनि। वैश्यानां चैव पंचदशाहे देयस्तु दशमस्तथा। शूद्रस्य दशमपिंडो मासे पूर्णे क्रियेत य
तेइति। पिंडदानप्रकारस्तु मात्स्ये। तैजसं मृन्मयं वापि पात्रं संशोध्य यत्नतः। तंडुलप्रसृति
तत्र प्रस्ताव्य द्विपंचेन स्वयं। द्वारोपांते ततः क्षिप्त्वा तु शुद्धां गोरमृत्तिकां। तस्य पृष्ठे संस्तरेद्दर्भा
न्याम्याग्रान्देशसंभवान्। तिलसर्पिर्मधुक्षीरैः संसिक्तं तत्समेव हि। दद्यात्प्रेताय पिंडं तु
५।ला दक्षिणाभिमुखस्ततः। प्रयाति यावदाकाशं पिंडोऽयमुपशीघ्रमयी शिखा। तावत्तस्य मुखे तिष्ठेत्सर्व ४२
तोयेक्षिपेत्ततइति। मृत्तिकालेपस्थंडिलापपिंडदद्यानियममाहाप्रथमेति। प्रथमदिने
पश्चदद्यात्तदेवोपरिष्टात्। यावद्दशाहमित्यर्थः। तथा च स्मृतिः। शालिनासक्तुभिर्वापि फ
लमूलादिभिस्तथा। प्रथमेऽह्नि यद्दद्यात्तदेवस्याद्दशाहकमिति। गृह्यकारिकायां उत्तरी
यशिलापात्रकर्तृद्रव्यविपर्ययो। पूर्वं दत्तांजलीन्दद्यात्सर्वपिंडांस्तथैव चेति। दर्भास्त

भापनवचनात्।तथौदनमपि निषिद्धं।एष्वाक्रवा भवेन्मुक्तं प्रेतोद्देश्य तो वशाः।अतो
नतोदे हिंसव्यंदि किमाः कार्यस्त्विशक्तितइतियाज्ञवल्क्यवचनात्।तथा।नार्क्षेहि एनिर्मितं यत्क
याहिंसेनास्ती तार्यां क्षितौ तेशां तस्यो तिनियताः सूत्रपुरीषादौ कृताचमनाः संतो निशायां रा
त्रावेव श्मशाने काकिनः संविशेयुः शरीरमस्थिस्पर्शः।तथाच मनुवचनं सर्वमुदाहृतं।मासा
शनेचनाश्नीयुःशयीरंश्च पृथक्क्षितौ दिति क्षितितिग्रहणा वृद्धा कंबलादि निषेधोनवृक
ट हस्येति दिक्॥२३॥संस्कर्त्तादिने भुंजे समधुरद्न ततः प्रत्यहं पिंडमेकं भूमावेवापेत प्र
थमदिन चरुद्रवमेवोपरिष्ठात्।दाहाक्रादेवगण्ये चयनं भूमिदं चार्क दिनो क्रांचदणिमेक दि॰१
स्मिन्नसमेवाहनि नवमदिने चानुपेतेऽनैतत्॥इदानीं दशाहांतर्गतं दशपिंडदानाहसंस्क
र्त्तेति।संस्कर्त्तादाहकः स्नानं पश्चादागतः भुक्त्वादि प्रत्यहं प्रतिदिनं दशाहावधि दर्भकुंजे।
नतु जलदानवत्पाषाणो।समधुयथा भवति तथा एकैकं पिंडं मर्वपेद्द्यात्।तथाच स्मृति
ः नवभिर्द्दिवसैर्द्द्यान्नवपिंडान्समाहितः दशमे पिंडमुत्सृज्य रात्रिशेषे शुचिर्भवेदिति।
शंखः भूमौ माल्यं पिंडमनुः लेपनं च दद्यात्करिति।उपलेवाद्द्यात्करितिपाठे उपाषाण मध्ये दे
श इति व्याख्येयमिति वाजपेययाजिनः।यद्यपि पारस्करेण ब्राह्मणो दशपिंडास्तत्र त्रियैद्वा
दशास्मृताः।वैश्ये पंचदश प्रोक्ताः त्रिंशच्छूद्रे प्रकीर्त्तिता इत्युक्तं।प्रत्यहमिति विशेषणसाम

पिड३

र्थ्यांचोपनीतविषयं।यत्तु प्रेतेभ्यः पिंडं बाहिर्दद्याद्दर्भमंत्रविवर्जितमिति तदनुपनीतविषयं।असं
स्कृतानां भूमौ पिंडं दद्यात् संस्कृतानां कुशेष्विति प्रचेतोवचनात्।पिंडदाने च पिंडस्य ज्ञातृत्वेनोत्ते
यं प्रेतयास्ने दिनत्रयमिति यद्यपि पितृयज्ञमकरोति दिङ्गतत्पापि पिटशाह्णं स्वधां वै वनं प्रयु
जीतकर्हिचित्।अत्रशब्दं तथाचेद्भ्रमयत्नेन न विवर्जयेत्।उपतिष्ठतामयं पिंडः प्रेताये ति
समुच्चरेद्धि।तिमरीचिवचनात्स्वधाशब्दादेर्भेचाणां च पर्युदासोत्र ज्ञेयः।प्रेतायान्नं वि
त्रयमिति फलतारतम्यार्थमिति विज्ञानेश्वरः।देवयाज्ञिकदद्दूस्त्वत्रशौचपरत्वमेस्य
त्याकुः।अ॰ तत्रा आशौचस्य च क्षासेपि पिंडान्दद्याद्दशैवत्विति वचनांतरविरोधात्।अस्त
ुरालो।सद्यः शौचेप्रदातव्याः सर्वेपि युगपत्तथा।त्र्यहाशौचे प्रदातव्याः प्रथमेत्वेकएवहि।द्वि
तीयेह्नि चत्वारः तृतीये पंचचैवहि।इति।एवं प्रकारतर माद्द पारस्करः।प्रथमेदिवसे देया
स्त्रयः पिंडाः समाहितैः।द्वितीये चतुरो दद्यादस्थिसंचयनं तथा।त्रींस्तु दद्यात्तृतीयेह्नि व
स्त्रादि क्षालयेत्ततः इति।शातातपः।सूत्लोकात्प्रेतलोकंतु गंतुं श्राद्धं समाचरेद्वैरेत्।तस्या
३दि चेयं भवति स्मृतस्य मनुजस्य क्षितौ।एतस्मिन्नपि पिंडदाने प्रक्रांते मध्ये दर्शपाते सति विशे
षमाह क्रोतविष्ये।प्रवृत्ताशौचतंत्रस्य यदि दर्शः प्रपद्यते।समाप्यचोदकं पिंडाः स्नानमात्रं
समाचरेत्।मालापिष्टविषये त्वाह गौतमः।अंतर्दशाहे दर्शश्चेत्तत्र सर्वं समापयेत्।पित्रो

स्कं यावदाशौचं दद्यात्पिंडं तिलांजलीनिति। मदनरत्ने गार्ग्योपि। दशाहमध्ये दर्शश्चेत्पिंडदानं नि
त्योदकं। पित्र्यं तु विनान्यैर्दर्शे चैव समापयेदिति। इदमपि त्र्यहमध्ये दर्शपाते। तदू
र्ध्वं दर्शे तु। पित्रोरपि तंत्रं समाप्यमेवेत्याहुर्गौडाः। पित्रोराशौचमध्ये तु यदि स्याद्दर्शः समापयेत्
तावदेवोत्तरं तंत्रं पर्ववस्यैत्र्यहात्परमिति। अन्ये त्वंतु त्र्यहमध्येपि समाप्तिः। मदनपारिजा
ते तु गार्ग्यवचनीयमापदनौरसपुत्रादिविषयं। त्र्यहोर्ध्वमपि पित्रोर्नैतिसमाप्तिरित्युक्तं। अत्र
देशाचाराद्व्यवस्थेति। निर्णयसिंधौ पित्र्यचरणाः। मदनरत्ने तु गार्ग्यवचनीयमशक्तविषयं। और
का सपुत्रैस्तु त्र्यहातिरिक्तविषयं चेत्युक्तं इदमेव युक्तं। उत्तरार्धे नास्थिसंचयनस्य कालमाह
दाहेति। चयनस्य। अस्थिसंचयनस्य दिनमा. नाहिताग्नेरपि दाहादेव गणयेन्न तु मरणादिना
नात्। तथा च गार्ग्यः। अनाहितमतश्चोक्तो नेताग्नेः संस्कारकर्मणः। शुद्धिः संचयनं दाहान्मृता
हस्तु यथातिथीति। इदं चास्थिसंचयनं दाहदिनतः यानि चत्वारि अहानि तेषां मध्ये एकस्मिन् ते
दिने कुर्यात्। यद्वा दाहदिनमारभ्य सप्तमेन नवमे वा कुर्यात्। तथा च संवर्तः। प्रथमेह्नि तृती
ये वा सप्तमे नवमेपि वा। अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सहेति। स्मृत्यंतरे तु द्वितीये ४३
त्वास्थिसंचय इत्युक्तं। अस्थिसंचयनं तु कत्यन्याह। निर्णयामृते पुनः। वर्जयेदेकपाद्दर्क्षे।
द्विपादर्क्षे अस्थियां प्रदाहे जन्मनक्षत्रे। त्रिपादर्क्षे विशेषत इति। पालेशेषोस्थिदाहो च सद्यः संच

संच तथा?

तस्य? ये

यनं न वेदि का काम्यमरणे त्रिरात्रमाशौचं द्वितीयेस्थिसंचय इत्युक्तं। अंगिराः। प्रेतीभूते
तं यो द्विज्यः शुचिर्नकिरोति चेत्। देवतानां च यजनं तं शपत्यस्य देवताः। यत्र स्थाने नवे
त्स्यतस्तत्र श्राद्धं प्रकल्पयेत्। एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः। ततः संचयनस्था
५ तथा ने तृतीयं श्राद्धमिष्यते। प्रेतस्यास्थि निगृह्णाति प्रधानां गोत्रजानि च। पंचगव्येन संस्ना
प्य तौमवस्त्रेण वेष्टयेच। अस्थिध्यन्मृन्मयेत्पात्रे नवे सोक्षादि तेषु तो। अरण्ये हस्तमात्रे
वा शुद्धे संस्थापयेत्पुनः। ततो नीत्वास्थीनि तज्जस्मनीत्वा तोये विनिक्षिपेत्। तथा। तत्स्थान
तनकै नीत्वा कृत्वा चित्ताक्षवीजलं। क्षिपति पति सपुत्रो दौहित्रो वा सहोदरः। मातुः कु
लं पितृकुलं वर्जयित्वा नराधमः। अस्थीन्यन्यकुलस्य नीत्वा चांद्रायणं चरेदिति। अ
स्थिक्षेपविधिस्तु निर्णयसिंधौ ज्ञेयः। नवश्राद्धानि त्वाह बौधायनः। मरणाद्विषमेषु नव
श्राद्धं कुर्याद्दानव मान्द्विनवमं विज्ञेयेते कावशेत्तं कुर्यादिति। तेन प्रथमे तृतीये पंचमे स
चेत प्तमे नवमे त्यैवं पंच नवश्राद्धानीति दिक्। अनुपेतेप्यनुपनीतेप्यत्र त्वास्थिसंचय
नं नेत्यर्थः॥२८॥ वर्णायस्यूल नेत्र परिवपनं न खलेदनंतर्दंतकाते मध्येवा किंचिदू
पितृपरमगुरुश्चेद्वा पादिनित्यो। अत्र स्मार्तभजनार्थम्। नाग्निमन्त्र णतत्र स्वर्गद्वैवि
दित्वा कृत्वादानं च दद्यात् [illegible] इदानीं वपनाद्याह वपोपसी

६ज सु?

ति। वयस्यसीहृद्दे ज्ञाते मृते सति कनीयसो तस्य सपिंडानां च परिवर्जमानानां मुखशिरोमणांव रो १
२न पनं वैवेदनं च स्नातकांते ऊचुः मद्ानां च परिस्नातकांते दशमेह्नि वपनादि कुर्युरित्यर्थः।
इदं च वपनं प्रथमे दशमे वा। आद्यं तूक्तं मिताक्षरायां। गंगायां भास्करक्षेत्रे माता पित्रोर्गु
रौर्मृतौ। आधाने सोमयागे च वपनं सप्तसु स्मृतमिति। इदं चाद्यदिने वपनं सदाद्योगमिति पि
कोचित्। अतएव रात्रिमृतस्य रात्रौ दग्धस्य सपिंडानां तत्कृत्वा वपनवर्जितं। वपनं नेष्यते रात्रौ
चस्नानी वपनक्रियेति। स्मृतिसंग्रहवचनेन रात्रौ दाहे सति। तदंगत्वेन पूर्वदिने प्राप्तं वपनं
ये तत्र निषिद्धं द्वितीये दिने विधीयत इति। यत्तु द्वितीयेह्नि कर्तव्यं चतुर्थकर्म प्रयत्नतः। तृतीये पं
चमे वापि दशमे वा प्रदानतः इति मिताक्षरायामिस्फक्तं। तत्प्रथमदिने संचयेतेयं। अस्थुसंके
क्रि शौचः सर्वेसोत्रके नाग्निप्रचापयेत्। द्वितीये तृतीये क्रिपंचमे सप्तमे पिवा। यावदाद्यं पदीपेत
तावदित्यपरे मतमिति। बौधायनवचनात्। एतेदानि सर्वेभ्यो वोक्तं मध्ये वाके विद्धत्तुरिति। पि
त्रपरमगुरुष्ठुमाता पित्रोराचार्ये वा ज्ञाते मृते सति पादिवपनादि नित्यमित्यर्थः। तथा चो वा ४
४४ क्तं। गंगायां भास्करक्षेत्रे इति। द्वितीयं त्वाह देवलः। दशमेह्नि संप्राप्ते स्नानं ग्रामाद्बहिर्भवे
ता तत्रत्याज्यानि वासांसि केशश्मश्रुनखानि चेति। व्यासोपि। आशौचांत्यदिने तीरं जनन्यां ४६
च गुरौ मृते इति। एतच्चैतात्यवयसामित्याहापस्तंबः। अनुभाविनां परिवपनमिति। अ

तुआविनः कनिष्ठाः। शावं दुःखमनुभवंति तादृशाः सपिंडास्तेभ्यो। अनुभाविनः पुत्रादयस्ते
के। तथाच व्यासः। पुत्रः पत्नी च वपनं कुर्याद्दिने यथाविधिं। पिंडदानोचितोन्येपि कर्यादि
कं समाहित इति। स्नातकांते युक्तकर्तव्यं तदा स्वत्रेति। अत्र मरणाशौचे स्नात्ते स्पृश्यत्क्तकेशो तेन्ट
पञ्चनीतं तिस्वस्त्ययनादि नणितं तदुक्तं। तत्सर्वं च गृह्यतो विदित्वा अनंतरं कृत्वा पश्चाद्भुत्तमय
४ निदे अश्रुजनाशार्थं स्नानप्राप्त्यर्थं। नृसुरेभ्यो विप्रेभ्यो दानं दद्यादिति स्पष्टं॥२१॥ दत्ता
पिंडे सपिंडाः परशब्दः दहनस्थापकाश्च व्रजित्वा तद्देशमधारिचास्य प्रशमितमनसो निं
वपत्रे विदश्य। आचम्याग्निं च दूर्वांकुरवरवृषभानहत्वा गोमयं च। स्पृष्ट्वा सिद्धार्थलिला
न्यपरषदि पदं न्यस्य सर्वे विशेयुः। शवदाहानंतरं गृहप्रवेशविधिमाह दत्तेति। पुत्रा
द्विसात्तादन्ये च सपिंडास्तेन सहाध्याचरणेन प्रथमदिने विहितं पिंडदानं कृत्वा। तथापरौ न
5 सपिंडाः ये शवदाहकाः तत्स्नापकाश्च तादृशास्ते प्रशमितमनसः प्रयातनैरिति द्रासे
विशोकीकृतमनसः दिवा मरणे सूर्यास्तपर्यंतं रात्रौ मरणे च सूर्योदयपर्यंतं बहिरेव स्थि
त्वा कनिष्ठपुरःसराः संतः अस्य प्रेतस्य पुत्राद्येर्दीक्षा रक्षिता निंबपत्राणि विदिश्य खंडयि
त्वा नडुहः। पितालाता नित्यस्त्वाचम्य। अग्न्यंबु दूर्वांकुर श्रेष्ठ वृषभान् अक्षतादीन् गोमयं
सिद्धार्थान् गौरसर्षपान् तैलं च स्पृष्ट्वा अपरपादि द्वारपाषाणे पदमेकं न्यस्य नत्रतं मुत्तीर्णा

स्मृ.२ प्रविशेयुः२ अथ नरक...

मृदु शाद्वलसंछिन्नां क्लान्ता नद्य वर्दैयुस्तानिति हारीतैः प्रशातनैः इति हारामासु ग्रे यमसर्वे स
पिंडाः असपिंडाश्च कनिष्ठपुरःसरा एव विशेयुः। याज्ञवल्क्यः। कृतोदकान्समान्वेषक
दलीस्तंभनिःसारं इत्यादयश्च इत्यंतरो इति संस्कृत्य गच्छेयुर्गृहं बालपुरःसराः विदश्यनिं
बपत्राणि नियतादारि वेश्मनः। आचम्याग्न्यादिसलिलं गोमयं गौरसर्षपान्। प्रविशेयुः समा
लभ्य कृत्वाश्मनि पदं शनैः प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपीति। पारस्करः। प्रेतस्पर्शि
नो ग्रामं न प्रविशेयुरा नक्षत्रदर्शनात् रात्रौ चेदादित्यस्येति। हारीतेन त्वन्नि छित्त्य शाखां कौश्रलेण
त्रमत्वा प्रविशेयुरित्युक्तं। पारस्करः। निवेशनद्वारे पिचुमंदपत्राणि विदिश्य आचम्योदकमग्निं गोम
यं गौरसर्षपांस्तैलमालभ्याश्मानमाक्रम्य प्रविशंतीति। बैजवापेन तु मेंः। शुक्रः। अश्मानमाल
भ्ने तेऽश्मेव दृढाः स्थिरा भूयास्मेति शमीमालभ्य तेशमी पापं शमयत्विति मन्त्रः। विप्रश्रुद्धत्य पस्पृश्य
त्क्षत्रियो वाहनायुधं वैश्यः प्रतोदरश्मीनायष्टिं शूद्रः कृतकृत्य इति दिक्॥ अनंतविबुधार्ये
ण कमलाकरसूनुना। योऽत्र श्रमः कृतस्तेन प्रीयतां रावणान्तकः॥ ३०॥ ॥ इति श्रीमत्पद
वाक्यप्रमाणपारावारपारीणजगद्गुरुश्रीरामकृष्णभट्टसूरिसूनुकमलाकरभट्टात्म ८४
जानंतभट्टविरचिता सुबोधिनी संज्ञा त्रिंशच्छ्लोकी मारव्या संपूर्णम्॥ ॥ श्री॥ ॥
॥ संवत् १७८८ वर्षे श्रावणशुदि द्वितीयायां बौ लिखितं॥ ॥ दाइआरामाशिवरामभट्ट
स्तकजे॥

व्वार